मोहरिते सच्चवयणस्स पलिमंथू ('ठाणंग'सूत्र, ५२९)
'मुखरता सत्यवचननी विघातक छे'

# अनुसंधान

प्राकृत भाषा अने जैन साहित्य विषयक
संपादन, संशोधन, माहिती वगेरेनी पत्रिका

५

संकलनकार : मुनि शीलचन्द्रविजय
हरिवल्लभ भायाणी



શ્રી હેમચંદ્રાચાર્ય

कलिकालसर्वज्ञ श्री हेमचन्द्राचार्य नवम जन्मशताब्दी
स्मृतिसंस्कार शिक्षणनिधि
अहमदाबाद
१९९५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोहरिते सच्चवयणस्स पलिमंथू ( ठाणंग-सुत्त, ४२९ )

'मुखरता सत्यवचननी विघातक छे'

# अनुसंधान

प्राकृत भाषा अने जैन साहित्य विषयक
संपादन, संशोधन, माहिती वगेरेनी पत्रिका

५

संपादको : मुनि शीलचंद्रविजय
हरिवल्लभ भायाणी

कलिकालसर्वज्ञ श्री हेमचंद्राचार्य नवम जन्मशताब्दी
स्मृति संस्कार शिक्षणनिधि
अमदावाद

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुसंधान : ५

संपर्क : हरिवल्लभ भायाणी
२४/२, विमानगर, सेटेलाईट रोड,
अमदावाद-३८० ०१५

प्रकाशक : कलिकालसर्वज्ञ श्री हेमचन्द्राचार्य नवम
जन्मशताब्दी स्मृति संस्कार शिक्षणनिधि,
अमदावाद, १९९५

किंमत : रू. २५-००

प्राप्तिस्थान : सरस्वती पुस्तक भंडार
११२, हाथीखाना, रतनपोळ,
अमदावाद-३८० ००१

मुद्रक : क्रिश्ना प्रिन्टरी
हरजीभाई ऐन. पटेल
९६६, नाराणपुरा जूना गाँव, अमदावाद-३८० ०१३
दूरभाष : ७४८४३९३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# निवेदन

'अनुसन्धान' धीमी गतिए पण आगळ वधी रह्युं छे, ए बदल सहज परितोष अनुभवाय छे. प्रथम त्रण अंको सुधी तेनी नकलो संशोधनना क्षेत्रमां कार्य करनार अनेक मुनिवरो, विद्वानो, अभ्यासीओने तेम ज पत्रपत्रिकाओ तथा संस्थाओने मोकलवामां आवेली. चोथा अंकथी ते प्रथामां थोडीक मर्यादा आंकी, अने केटलांक स्थळे ए अंक भेट मोकल्यो, तेमां एक छापेल पहोंच धरावतुं कार्ड पण मोकल्युं. खेदनी बाबत एटली ज के आ कार्डमां पोताना हस्ताक्षर करी टिकिट लगाडी पाछुं मोकलवानी चीवट पण, पांच-छ व्यक्तिने बाद करतां, कोईए राखी नथी ! अने प्रथमना त्रण अंको मेळवनाराओ पैकी कोईनी, चोथो अंक प्रकट थयो के नहि ?/ थशे के नहि ?/ थाय त्यारे मोकलशो के नहि ?, आवी पडपूछ पण आवी नथी. 'अनुसन्धान' अनियतकालिक छे, अने ट्रस्टनी आर्थिक जोगवाईने आधीन तेनी प्रकाशन-वितरण-व्यवस्था होय छे, एटले लवाजमनो तो कोई प्रश्न ज नथी; छतां आटली बधी उदासीनता केम हशे ? तेवो प्रश्न, आ स्थितिमां, कोईने पण थाय खरो.

अस्तु. फरी एकवार जाहेर करीए के आ पत्रिका संशोधनात्मक पत्रिका छे. ऊहापोह संशोधननो पायो छे. आमां आ आम ज होय/हतुं/हशे-एवा वलणने कोई अवकाश न होय. आ दृष्टिने लक्ष्यमां राखी अभ्यासीओ आ पत्रिकामां रस ले ते अपेक्षित छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

: आर्थिक सौजन्य :

श्री कारेलीबाग श्वेताम्बर मूर्तिपूजक जैन संघ, वडोदरा
तरफथी 'अनुसंधान-५'ना प्रकाशनमां संपूर्ण
आर्थिक सहयोग प्राप्त थयेल छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अनुक्रम


| | | |
|---|---|---|
| १. 'धूमावलि'-प्रकरणं | संपा. आ. विजयसूर्योदयसूरि | १ |
| २. प्राकृतशब्दा संस्कृते नानार्थाः | संपा. शीलचंद्रविजय गणी | ४ |
| ३. 'शब्दार्थ चन्द्रिका' (पं हंसविजय-विरचित) | संपा. मुनि धर्मकीर्तिविजय | १२ |
| ४. वे सरस्वती-स्तोत्र | संपा. मुनि रत्नकीर्तिविजय | २४ |
| ५. हीरविजयसूरिनो लेख | संपा. मुनि महाबोधिविजय | ३९ |
| ६. शत्रुंजय-मंडन-ऋषभदेव-स्तुति | संपा. मुनि भुवनचन्द्र | ४० |
| ७. 'चोवीस-जिन नमस्कार' (अष्टमी,माहात्म्य-गर्भ) (वाचक यशोविजय-कृत) | संपा. शीलचन्द्रविजय गणि | ४४ |
| ८. त्रण चउवीसी विहरमाण-जिन-स्तवन (लक्ष्मीसगरसृष्टि-शिष्य-कृत) | संपा. मुनि कल्याणकीर्तिविजय | ४७ |
| ९. 'उवहाण पइट्ठा पंचासग' उपरथी फलित थतो एक मुद्दो | पं. शीलचन्द्रविजय गणि | ५२ |
| १०. उमास्वाति-आर्यसमुद्रनां नवप्राप्त पद्यो विषे | मधुसूदन ढांकी | ५४ |
| ११. रिस्टोरेशन ऑफ धी ओरिजिनल लेग्वेज ऑफ धी अर्धमागधी टेक्स्ट्स : एक परिचय | के. आर. चन्द्र | ६० |
| **१२. टूंक नोंध** | | ६३-६७ |
| १. वाचक उमास्वाति(?)नुं वधु एक पद्य | | |
| २. शुं आ गप्पुं गणाय ? | | |
| ३. 'स्थूर' विषे बे वधु उल्लेखो | | |
| ४. 'नखच्छोटिका', 'ढौक', 'सुखासिका/दुःखासिका', 'ललते' | शीलचन्द्रविजय गणि | |
| ५. 'पांडवचरित्र-बालावबोध'ना थोडाक शब्दप्रयोगो विषे | मुनि भुवनचन्द्र | |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

६. केटलाक कथाघटको ६८-८०

१ परपुरुषनो संग निवारवा स्त्रीने पेटमां संताडी राखवी

२. बोलायेलां बचनो अकस्मात् सांभळी भळतो
ज अर्थ लेता हत्याराथी उगारो थवो

३. चार मूर्खाओ

४ गामडाह्यानो अज्ञानविलास : होदड जोशी

५. अक्कलना ओथमीर

६. अज्ञान ढांक्युं न रहे

७. उत्तम पुत्र प्राप्तिनुं शरती वरदान

८. खाउधरो शिष्य

९. सामान्य शब्दोनुं मार्मिक अर्थघटन ह. भायाणी

७. प्रयोगनी पगदंडी ८१-८४

१. 'सीझवुं' के 'सीजवुं'

२. 'सुनासणा'

३. झंबइकगीतनुं वधु एक उहाहरण

४. गोरखनाथनुं एक पद ह. भायाणी

नवप्रकाशित साहित्यनो परिचय ८५

प्रकाशन-माहिती ८७

८. अज्ञातकर्तृक अर्हत्प्रवचनसूत्र-सविवरण सं. शीलचंद्रविजय गणि ८८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## सूरिपुरन्दर श्री हरिभद्रसूरि-विरचित

# "धूमावली"-प्रकरण

—सं. आ. विजयसूर्योदयसूरि

आचार्य श्री हरिभद्रसूरि महाराजनी अनेक रचनाओ प्रसिद्ध अने प्रतिष्ठित छे. तेमनी रचेली कृतिओनी नोंध 'गणधरसार्धशतकवृत्ति' (सुमतिगणि, सं. १२९५)मां तथा 'चतुर्विंशतिप्रबन्ध' (राजशेखरीय)मां मळे छे. ('हरिभद्रसूरिः जीवन अने कवन', ही. र. कापडिया, वडोदरा, पृ. ४८). पण ते सूचिओमां 'धूमावली' नामनी रचनानी कोई नोंध नथी.

'धूमावली'नी प्राप्ति फुटकर-पत्रोमांथी आनायासे थई छे. एक ज पत्र, ते पण छेडेथी फाटेलुं, जूनां पत्रो फेंदता फेंदता मळी आव्युं, अने ते जोतां १४मी गाथामां स्थित 'भवविरह' पदे ध्यान आकर्ष्युं. आ पद तो हरिभद्रसूरिजीनी पाकी ओळखनुं पद गणाय. एटले आनी प्रतिलीपि अत्रे प्रस्तुत करी छे. आना विशे क्यांक उल्लेख मळे के आनी बीजी नकलो मळी आवे, तो आ कृति अने तेना कर्ता विशे वधु चोकसाई करी शकाय. अत्यारे तो 'भवविरह' पदने ज प्रमाणभूत गणी ते हरिभद्रसूरि-कृत समजी अहीं प्रसिद्ध करवामां आवे छे.

'जिनरत्नकोश' (वेलणकर, ई. १९४४, पृ. १९८) तपासतां तेमां जयभूषणकृत 'धूमावलिका' नामक कृतिनो तथा 'धूमावल्यादिवृत्ति' नामे शीलाचार्यनी रचनानो उल्लेख छे. वादिवेताल शान्तिसूरिकृत 'पर्वपंचाशिका' पर शीलाचार्यकृत वृत्ति ते ज 'धूमावल्यादिवृत्ति' होवानुं प्रा. वेलणकर निर्देशे छे.

'पर्वपंचाशिका' जो के जिनेश्वरनी स्नात्रादिपूजाना विषयनी ज रचना छे, अने प्रस्तुत कृति पण धूपपूजाना विषयनी ज छे, छतां आ 'धूमावली' स्वतंत्र अथवा जुदी ज कृति छे, तेम कल्पना थाय छे. कृतिमां तूटतो अंश अटकलथी [ ] मां उमेर्यो छे. देखीता लेखनदोष सुधारी लीधा छे. लखावट जोतां प्रति (पानुं) संभवतः १७ मा सैकानुं जणाय छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## "धूमावली"- प्रकरणम् ॥

असुरिंदसुरिंदाणं किन्नरगंधव्वचंदसूराणं।
विज्जाहरियसुराणं सजोगसिद्धाण सिद्धाणं॥१॥
मुणियपरमत्थवित्थर-विगिट्ठविविहतवसोसियंगाणं।
सिद्धिवहुनिब्भरुक्कंठियाण जोगीसराणं च॥२॥
जे पुज्जा भगवंतो तित्थयरा रागदोसतमरहिया।
विणयपणएण तेसिं समुद्धुओ मे इमो धूओ॥३॥
तित्थंकरपडिमाणं कंचणमणिरयणविद्दुममयाणं।
तिहुअणविभूसगाणं सासय-सुरवरकयाणं च॥४॥
चमरबलिप्पमुहाणं भवणवईणं विचित्तभवणेसु।
जाओ य अहोलोए जिणिंदचंदाण पडिमाओ॥५॥
जाओ य तिरियलोए किन्नरकिंपुरिसभूमिनयरेसु।
गंधव्वमहोरगजक्खभूय तह(य)रक्खसाणं च॥६॥
जाओ य दीवपव्वय-विज्जाहरपवरसिद्धभवणेसु।
तह चंदसूरगहरिक्ख-तारगाणं विमाणेसु॥ ७॥
जाओ य उड्ढलोए सोहम्मीसाणवरविमाणेसु।
जाओ मणोहरसणंकुमारमाहिंदकप्पेसु॥ ८॥
जाओ य बंभलोए-लंतयसुक्के तहा सहस्सारे।
आणयपाणयआरण-अच्चुयकप्पेसु जाओ य॥ ९॥
जाओ गेविज्जेसुं जाओ वरविजयवेजयंतेसु।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तह य जयंतपराजि[ यविमा ]णसव्वट्ठसिद्धेसु ।। १० ।।

सिद्धाण य सियघणकम्म-बंधमुक्काण परमनाणीणं ।

आयरिया [ण तहेव य पं]चविहायारनिरयाणं ।। ११ ।।

तह य उवज्झायाणं साहूणं झाणजोगनिरयाणं ।

तवसो( सु )सियसरीराणं सिद्धिवहूसंगमपराणं ।। १२ ।।

सुयदेवया वि पंकय-पुत्थ[ य ]मणिरयणभूसियकराए ।

वेयावच्चगराण य समुद्धुओ मे इमो धूओ ।। १३ ।।

एवं अभित्थुया मो ( मे ) भावसुगंधेण परमधूवेण ।

तित्थयरसिद्धपमुहा सव्वे वि कुणन्तु **भवविरहं** ।। १४ ।।

* * *

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# प्राकृतशब्दाः संस्कृते नानार्थाः ॥

-सं. पं. शीलचन्द्रविजय गणि

छाणीना प्र.श्री कान्तिविजयजी-शास्त्रसंग्रहमां क्र. ७१३नी प्रति, नामे 'प्राकृत शब्दोना संस्कृत अर्थ' एवी छे. २ पत्र छे. संभवतः १७मा शतकनी छे.

मूल १४ प्राकृत गाथाओ छे, ते पर संस्कृत विवरण छे. मूळ बीजी गाथाना "**निन्हणकइणा** भणिज्जंतं" ए सन्दर्भ जोतां 'निन्हण' नामे कोई कवि आ कृतिना कर्ता जणाय छे. आथी विशेष परिचय प्राप्त नथी. ६६ प्राकृत शब्दोना संस्कृत-अनेकार्थो आमां कर्ताए वर्णव्या छे, जे प्रारंभिक अध्येताओने तेमज रचयिता अभ्यासुओने उपयोगी थई पडे तेम छे.

## प्राकृतशब्दाः संस्कृते नानार्थाः ॥

इक्कम्मि पए पयडत्थसंगए बहुलअत्थसंदोहं।
अप्पम्मि व अप्पाणं पिच्छंती भारई जयइ॥ १॥
इक्कं पाययसद्दं सक्कयभेएण बहुविहवियप्पं।
निसुणंतु सुअणसत्था ! **निन्हणकइणा** भणिज्जंतं॥ २॥
मुणह **पउत्तं** एआरहेहि **अहरं** च पंचभेएण।
**अउलं** चिअ पंचविहं **सत्तासं** छव्विहं होइ॥ ३॥

अत्र प्राकृते '**पउत्त**' इति शब्दस्य संस्कृतेन व्याख्यायमानस्यैकादशार्था भवन्ति। यथा-प्रयुक्तं प्रेरितं १। प्रयुक्तः प्रमोहितः२। प्रवुप्तो मन्दः ३। प्रगुप्तोऽविज्ञातस्वरूपः ४। प्रकुप्तोऽतिशयेन कोपाविष्टः ५। प्रवृत्तः कर्तुं प्रस्तुतः ६। प्रोक्तो भणितः ७। प्रपुत्रः पुत्रपुत्रः ८। पदोक्तः पदकथितोऽर्थः ९। पयोक्तः पयसा मिश्रितः १०। प्रोप्तः सूत्रादिविद्धो हारादिः ११। एवमेकादशार्थाः 'पउत्त' शब्दस्य॥

तथा 'अहर' इति पञ्चधा। यथा -अधर ओष्ठाद्यनेकार्थः१। अगृहो गृहरहितः२। अभरो भररहितः ३। अहरं अमहेश्वरं ४। अखरः कोमलः, अरासभः अपटुर्वा इत्ययं पञ्चप्रकारः॥

'अउलः' पञ्चधा। यथा-अतुलोऽपरिमाणः १। अकुलः कुलरहितः २। अगुलः इक्षुविकाराभावः ३। अपुलोऽमहान् ४। अचुलोऽस्निग्धः ५।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं 'सत्तास' इति षोढा। यथा -सत्रासः सभयः १। सप्ताश्वः सूर्यः २। सत्त्वाशो जीवादनः ३। शक्त्राश्वो रथः ४। शप्ताश आक्रुष्टाभिलाषः ५। सत्त्वासः शूरः ६। एते षट्॥ इति प्रथमगाथार्थः॥

**सयलो** अट्ठविहाणो सत्तसु भेएसु पयडिओ **सवओ**।

**पययत्ति** सत्तभेओ पंचसु भेएसु **सुइ** सद्दो॥ ४॥

'सयल' इत्ययं संस्कृतेनाष्टधा। यथा-शकलः खण्डः १। सकलं समग्रं २। सदलः सपत्रः सकटको वा ३। सजलं सनीरं ४। सतलं साधारं ५। सचलं सकम्पं ६। सगलः सकण्ठः ७। स्वकल आत्मवर्गग्राहकः ८ इत्यष्टौ॥

'सवय' इति सप्तधा। यथा -स्वपदं स्वस्थानं १। श्रवको दाता २। सव्रतः सानुष्ठानः ३। सव्रजः सगोकुलः ४। सवया वृद्धः समानो वा ५। सवचा वाग्मी ६। सबको बकयुतः ७। एते सप्त॥

'पयय' इति सप्तधा। यथा-पयोजं कमलं १। पयोदो मेघः २। पयोगा नदी ३। पतगः पक्षी ४। पदगः पदातिः ५। प्रकृतं प्रस्तुतं ६। प्रगतः प्रचलितः ७। एते सप्त॥

'सुइ' इति पञ्चधा । यथा - श्रुतिर्वेदाद्यनेकार्थः १। श्रुतिः प्रवाहः २। शुचिराषाढाद्यनेकार्थः ३। शुदिः शुक्लपक्षो लोकप्रसिद्धः ४। शुचिः स्नानं ५। एते पञ्च ॥

**'सुरयण'** सद्दो पञ्चसु, छसु भाणिओ **अप्पमाणसद्दो** य।

तह तब्भेओ **अमओ** चउसुं **अणहत्ति** भणियव्वो॥ ५॥

अत्र 'सुरयण ' इति पञ्चधा भवति। यथा-सुरगणो देवसमुदायः १। सुरदनः सुदन्तः २। सुरचनं विशिष्टरचनायुक्तं वस्तु ३। सुरत्नं पद्मरागादि दोषरहितं ४। सुरजनं शोभनरागः ५। एते पञ्च॥

'अप्पमाण' इति षोढा । यथा-अप्रमाणोऽमर्यादाद्यनेकार्थः १। अल्पमानः स्वल्पाहंकारः २। आत्ममान आत्मतुल्यः ३। आप्यमानः प्राप्यमानः ४। अर्प्यमाणो ढौक्यमानः ५। अप्रमाज्ञो महच्छासनः ६।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अमय' इति षोढा। यथा-अमृतं पीयूषं १। अमृगो मृगरहितो देशः २। अमतं अनभीष्टं ३। अमदो मदरहितः ४। अमृजोऽशुद्धः ५। अमयं हरिमयं ६। एवं षट्।।

'अणह' इति चतुर्धा। यथा-अनखो नखहीनः १। अनघोऽपापः २। अनभोऽशून्यं ३। अनहो बन्धरहितः ४। एवं चत्वारः।।

अट्ठविहो **सज्जत्थो** पंचविहो **सायरत्ति सत्थित्ति**।

चउहा **विज्ज त्ति** पयं तह **सज्झो** होइ तब्भेओ।। ६।।

'सज्जो'ऽष्टधा। यथा-सर्जो रालावृक्षः १। सज्जः प्रह्वः २। सज्यं समारोपितप्रत्यञ्चं धनुः ३। साज्यं सघृतं ४। सद्यस्तत्क्षणं ५। साद्य आदियुक्तः ६। सार्य आर्ययुक्तः ७। षड्जः स्वरविशेषः ८।।

'सायर' इति पञ्चधा। यथा-सादरः सगौरवः १। स्वादरः स्वादुदाता २। सागरोऽब्धिः ३। साकर आकरयुक्तो देशः ४। सातरः सुखदः ५।।

'सत्थि' इति पञ्चधा। यथा-स्वस्तिराशीर्वचः १। शस्तिः शस्त्रागारं शुद्धं वा २। सक्त्थिर्जानुः ३। शास्तिदण्डः ४। शास्तिः शाधिः ५।।

'विज्ज' इति चतुर्धा। यथा -वैद्यो भिषक् १। वीर्यं बलं २। वेद्यं ज्ञेयं ३। वीज्यं निर्वाप्यं ४।

'सज्झ' इति चतुर्धा। यथा-सह्यः पर्वतः सहनीयो वा १। साध्यं निष्पाद्यं २। सह्यः सप्रातः ३। साहाय्यं सहायित्वं ४।। इति तुर्यगाथा पर्यायाः।।

**णायं अहयं सवहं अहिमयरं** तह **सहाए** संजुत्तं।

पंच वि पंच पयारा नायव्वा सत्थकुसलेहिं।।७।।

एते 'णाया' दि पञ्चापि पृथक् पृथक् पञ्चार्थाः। यथा-नाकः स्वर्गः १। नागः सर्पाद्यनेकार्थः २। नादः शब्दः ३। न्यायो नीतिः ४। ज्ञातमुदाहरणं अवगतं वा ५।।

''अहयं' पञ्चधा। अहयोऽनश्वः १। अहतोऽप्रहतः २। अथ चेत्यानन्तर्यार्थमयं ३। अभयो निर्भयोऽपि ४। अभगोऽयोनिः ५।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सवह' इति पञ्चधा। यथा-स्वपत स्वापं कुरुत १। शपथः प्रतिज्ञा २। सपथः समार्गः ३। सवहः सवाहनः ४। स्ववध आत्मवधः ५॥

'अहिमयरः' पञ्चार्थो यथा-अधिमकरः समुद्रः १। अहिमकरः सूर्यः २। अहिमचरः सर्पः ३। अभिमतरोऽभीष्टदाता ४। अहिमतरोऽत्युष्णः ५॥

'सहा' इत्ययमपि पञ्चार्थो यथा-स्वाभा स्वदीप्तिः १। सभा परिषत् २। सखा मित्रं ३। स्वधा पितृवधः ४। स्वहा आत्मघातकः ५॥ इति पञ्चमगाथार्थः॥

**आसा**सत्ति चउद्धा **आयासं** मुणह तह य तब्भेयं।

**पव्वइओ** तह य च्चिय भणिओ **कुहरत्ति** पंचविहो॥ ८॥

'आसासा' शब्दश्चतुर्धा। यथा-आश्वासः संधारणं १। आशाशं दिशिदिशि २। आश्वास्यं हयमुखं ३। आशास्यमाशंसनीयं ४॥

'आयास' श्चतुर्धा। यथा-आकाशं खं १। आयासः खेदः २। आयाशो आयभोक्ता ३। आदासं दासपर्यन्तं ४॥

'पव्वइय' श्चतुर्धा। यथा -पार्वतिकः पर्वतनिवासी लोकः १। प्रवजितो व्रती २। पर्व इतः सन्धिगतः ३। पर्वदिनो ग्रन्थिच्छिन्नः ४॥

'कुहर' इति पञ्चधा। यथा-कुधरः पर्वताद्यनेकधा १। कुगृहः कुत्सितगृहः २। कुहरो दरी ३। कुभरः पृथ्वीधरः ४। कुखर ईषत्कर्कशरूपः विरूपगर्दभो वा ५। षष्ठगाथापर्यायाः॥

**कइलास कव्वफलिहा वास अहोवाह पत्र सउणा** य।

**कीलालायण**सहिआ एए अ चउव्विहा हुंति॥

'कइलास' श्चतुर्धा। यथा-कैलाशो गिरिः १। कविलासं कवीनां लसनं २। कपिलाशः पिङ्गलाशो देशः ३। कपिलासः कपीनां लसनं ४॥

'कव्वं' कवेर्भावः कर्म वा १। क्रव्यमामिषं २। क[इ]व ब्रह्म यथा ३। कव्यं पैत्रं कर्म ४।

'फलिह' श्चतुर्धा। यथा-स्फटिकः १। परिखा खातिका २। परिघः ३। फलिहो रत्नविशेषः ४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'व्यासो'ऽपि चतुर्धा। यथा-व्यासो मुनिः १। वासो गृहं २। वासो वस्त्रं ३। व्याशो नष्टदिक् ४॥

'अहो'ऽपि चतुर्धा। यथा-अहो आश्चर्ये १। अहर्दिनं २। अथो आनन्तर्ये ३। अधस्तलपर्यायः ४॥

'वाहो'ऽपि चतुर्धा। यथा-वाहोऽश्वाद्यनेकार्थ १। व्याधः २। बाष्पो अश्रुः ३। बाधः पीडा ४॥

'पन्नो'ऽपि चतुर्धा। यथा-पर्णं पत्रं १। पण्यं विक्रेयद्रव्यं २। पण्या वेश्या ३। प्रज्ञा बुद्धि ४॥

'सउणो'ऽपि चतुर्धा। यथा-सगुणो गुणयुक्तः १। शकुनः पक्षी २। सपुनः-सपुरुषः ३। पुनः पुनः स तु न। न पुनर्भवतीत्यर्थः ४॥

'कीलालाअण' इति चतुर्धा। यथा-क्रीडालागनो रतिविषयोत्पादयिता १। कीलालायनो मद्यमार्गो रुधिरमार्गो वार। कीलालादनो राक्षसः ३। कीलालापणं मद्यकरहट्टं ४॥ इति सप्तमगाथापर्यायाः॥

**सवणो** चउप्पयारो **विणय** (विअण)**त्ति मुहेण छव्विह वियप्पो**।

पंचविह **सुत्तसद्दो** तिहि भणिओ कईहिं **वच्छो** अ॥१०॥

'सवणो' पि चतुर्धा। यथा-सव्रणः सक्षतः १। सवनं यज्ञाद्यनेकधा २ श्रवणं श्रोत्राद्यनेकार्थः ३। स्वप्नं निद्रा ४॥

'विअणः' षोढा। यथा-व्यजनं तालवृन्तं १। विजनं एकान्तः। विगणः पक्ष-वर्जः ३। द्विगुणः गुणद्वयं ४। वियणा वेदना ५। द्विजनः जनद्वययुक्तः॥ ६॥

'सुत्त' इति पञ्चधा। यथा -सूत्रं तन्त्राद्यनेकार्थं १। सुप्तः २। सूक्तं ३। सुक्तं मद्यविशेषः ४। सूप्तं सुवापं क्षेत्रं ५॥

'वच्छ' त्रिधा। यथा-वृक्षः १। वक्षः २। वत्सोऽपत्यं वा ज्योतिःप्रसिद्धो वत्सस्तारः ३॥

**कोसिअ-कणिअं कलिआ कुच्छेअय-कइपहू असप्पत्ता।**

**चित्तयरो अहिअजुओ** इक्किक्को चउविहो सद्दो॥ ११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कोसिम' इत्याद्या वेदार्था:॥ 'कोसिअ' क्रोत्सित आक्रुष्ट: १। कौशिक उलूकादि: २। कोऽशित: को भक्षित: कोऽतीक्ष्णो वा ३। कोषितो जलशायी ४॥

'कणय' श्चतुर्धा। यथा -कनकं १। कणय आयुधविशेष:२। कनद: कुत्सितनद: ३। कणद: कणदाता ४॥

'कलिका' कुड्मलं १। कलिता लक्षिता २। कलिजा कलौ जाता ३। कलिदा युद्धदायिनी ४॥

'कुच्छेअ'[य] चतु:प्रकारो यथा-कौक्षेयक: खड्ग: १। कुच्छेदज: भूविनाशोत्पन्न: २। कूच्छेदको भूविनाशकर: ३। कुच्छेदगो धरां गत: ४॥

'कइ' चतुर्धा। यथा-कवि १। कति संख्यावाची २। कवि: धरैडक: ३। कपिर्वानर: ४॥

'पहूअ' श्चतुर्धा। यथा -प्रधूत:-प्रकम्पित: १। प्रभूतं बहु ३। प्रधूपो यक्षधूपादि: ३। प्रधूय इति क्त्वान्त: ४॥

'सपत्त' श्चतुर्धा। यथा -सपत्र: पर्णयुक्त: सवाहनो वा १। सपात्र: सभाण्ड: २। स्वप्रास: स्वयंग्राह: ३। सर्पत्र उरगत्राता ४॥

'चित्तयर' चित्रकर: चित्राम्बुदो वा १। चित्तचर: काम: २। चित्तदरो मनोभयं ३। चित्रगरो चित्रविषं ४॥

'अहिअ' इति अधिक: १। अहितो विष्णुहित: शत्रु: २। अभिक: कामी ३। अहिज: सर्पजात: ४॥

पंच **पओस-निसायर-गयाहरा पउहरो** अ तब्भेओ।

**पाययसद्दो** अट्ठसु **पहाअरा** इत्थ छब्भेया॥ १२॥

'पओस:' पञ्चधा। यथा-प्रदोषो रजनीमुखादि: १। प्रतोष: परिपुष्टि: २। प्रकोश उत्कृष्टभाण्डागारादि: ३। प्रपोष उत्कृष्टपुष्टि: ४। प्रवोष उत्कृष्टपानं ५॥

'निसायर:' पञ्चधा। यथा-निशाकरश्चन्द्रो हरिद्राकरो हरिद्रोत्पादयिता वा १। निशाचरो रात्रिचरो राक्षसो वा २। निशातरो रात्रौ तरणं ३। निशागरो हरिद्राक्षोर: (द:) ४। निशादरो रात्रिभयं ५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'गयाहरः' पञ्चधा। यथा-गदाधरः १। गदाहरो गदाचौरः २। गताधरो विगतौष्ठः ३। गजाखरो हस्तिकोमलः ४। गवा वृषभेन आ समन्तात् चरतीति गवाचरः, ईश्वरो वा ५॥

'पओहरः' पञ्चधा। पयोधरो मेघादिः १। पयोहरो वडवाग्निरगस्तिर्वा २। पयोभरो जलौधः ३। पयोगृहं समुद्रादिः ४। प्रगोखरं शोभन गोरासभं ५॥

'पाययो'ऽष्टधा। यथा -प्राकृत इतरजनः १। प्र(प्रा)गतं वर्य(र्या)गमनं २। पातकं अधर्मः ३। पातगः शीघ्रगामी ४। पादगः पदात्यादिः ५। प्रापदः प्रकृष्टज्ञानदः ६। पातजं श्रमः ७। पातयेति क्रिया ८॥

'परयारः' षडर्थो यथा-परदारः परभार्यः कापुरुषः २। परकारः परप्रेरकः २। परचारः परगतिः ३। परतारः परोद्धारकः ४। परजारः ५। परगारः परनिगरणं ६॥

'पहायरः' षोढा। यथा-प्रभाकरो रविः १। प्रभाचरो ज्योतिर्गमनं २। प्रभातरः प्रभातदाता सूर्यादिः ३। प्रभाजरः कान्त्या जीर्णः ४। प्रभादरः कान्तिभयं ५। प्रभातरः प्रहारदः ६॥

**सरयं सयणं सणयं गयणयरं सहिअ** तहय **सुव्वत्तं**।
**मयणाही सामलया** अट्ठासु इ(वि) पंचहा सद्दो॥१३॥

'सरया'द्या पञ्चार्थाः। यथा-शरदृतुः १। शरदः शरखण्डकः शरप्रदः २। सरदः सदन्तः ३। सरको मद्यं ४। सरयः सवेगः ५।

'सयणः' पञ्चधा। शयनं पर्यङ्कादिः १। सजनो जनसहितः २। सदनं गृहं ३। सकणं कणसहितं सशब्दं वा ४। सगणः ससमूहः ५॥

'सणयः' पञ्चधा। सनयो नयसहितः १। सनगः सपर्वतः सवृक्षो वा २। सनतः ३। स्वनदः स्वशब्दः ४। सनकः पूज्यनरः ५॥

'गयणयरः' पञ्चधा। गगनचरः सूर्यादिः १। गतनगरो विपुरः २। गदनतरं प्रकृष्टवचः ३। गतनयरो गतन्यायप्रदः ४। गगनकरः आकाशकरः ५।

'सहियः' पञ्चधा। सहितो हितयुक्तः १। सखितः सख्युः २। सखिदः सखिप्रदः ३। स्वहित आत्महितः ४। सखिगो मित्रसहगामी ५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सुव्वत्तं' पञ्चधा। सुवार्त्ता शोभनकथा १। सुव्यक्ता सुप्रकटा २। सुव्याप्ता सुक्रान्ता ३। सुव्यात्ता सुप्रसारिता ४। शुल्बत्रा ताम्ररक्षकः ५।

'मयणाही' पञ्चधा। मृगनाभी १। मदनाभी कामाभयः२। मदनाधिः कामचिन्ता ३। मृतनाभिर्मृततुन्दं ४। मदनाही कामसर्पौ ५।

'सामलया' पञ्चार्थः। श्यामलता कृष्णलता कृष्णता वा १। सामलका आमलकसहिता २। सामलया देवविशेषप्रयोगा नीतिप्रयोगा वा ३। सामलता प्रसिद्धा ४। सा मलदा मलं ददाति खण्डयति वा ५॥

**सावय** सद्दो पंचसु तब्भेओ **सच्छरायणो पाओ**।

तह **सुअ सरोअआ** वि हु नायव्वा सत्थकुसलेहिं॥

प्राकृते 'सावयः' पञ्चार्थः। श्वापदोऽरण्यजीवः १। श्रावको जिनभक्तः श्रोता वा २। शापद आक्रोशदाता ३। सापगः सदापानीयो देशः सनदिको वा ४॥

'सच्छरायणः 'पञ्चधा। साप्सरोगणः -अप्सरोगणसहितः १। स्वाक्षरोगणः स्वकेन्द्रियदीपनः २। साक्षरायनः पण्डितगमनः ३। स्वच्छरदनो-स्वच्छदन्तसमूहः ४। स्पप्सरायनं देवमार्गः ५॥

'पायः' पञ्चधा। प्रायो बाहुल्यं १। पादोंऽह्रिश्चतुर्थांशो वा २। पातः पतनं ३। पाकः पचनमन्त्रादेः ४। पापः पाप्मा नरः ५॥

'सुअ' पञ्चधा। यथा-सुतः पुत्रः १। शुकः कीरादिः २। श्रुतं शास्त्रं कर्णाभ्यां पूर्वश्रवणं ३। शुक् शोकः ४। सुदः सुष्ठु दाता ५॥

'सरोअअ' पञ्चधा। सरोजकं कमलं १। सरोगो रोगी तडाकगो वा २। सरोदयो नाडीवायुप्रचारः ३। सरोपकं काण्डजलं ४। सरोचको रुचिकरः पदार्थः ५॥

**इति प्राकृतशब्दाः संस्कृते नानार्थाः॥**

* * *

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# 'शब्दार्थ-चन्द्रिका'

## ( पं. हंसविजय विरचित )

-सं. मुनि धर्मकीर्तिविजय

सत्तरमा सैकामां थयेला कविवर पंडित मुनिश्री हंसविजयजीए रचेली "शब्दार्थचन्द्रिका" नामे व्याकरणविषयक लघु रचना अत्रे यथामति संपादन करवापूर्वक प्रस्तुत छे. आ कृतिनी कर्ताए स्वहस्ते लखेली एक प्रति-६ पत्रोनी मारा पूज्य गुरुमहाराजश्रीना अंगत पुस्तक संग्रहमांथी प्राप्त थई छे, तेना परथी संपादन करेल छे. अन्य भंडारोमां आनी बीजी प्रतिओ पण प्राप्त थाय छे, परंतु कर्ताना स्वहस्तनी प्रति उपलब्ध होवाथी अन्य प्रतिनो उपयोग कर्यो नथी.

सारस्वत व्याकरणना प्रथम बे पद्य उपर ग्रंथकारे "संहिता च पदं चैव" ए प्रसिद्ध पद्य -आधारित विशद विवरण आ रचनामां रजू कर्युं छे, जे नवा अभ्यासीओ माटे घणुं उपकारक छे.

कर्तानी 'अन्योक्ति मुक्तावली' नामे अन्य सरस काव्यरचना छे, जे मने मारा गुरजी तरफथी जाणवा मळेल छे. पुष्पिकामां जणाव्या प्रमाणे ग्रंथकार तपागच्छीय आचार्य श्री विजयानन्दसूरि (आणसूर शाखाना आद्याचार्य) जीना शिष्य हता. ऐतिहासिक साधनोना आधारे आ उपरथी तेमनो सत्तासमय सत्तरमो सैको होवानुं मानी शकाय.

विद्यार्थी एवा मारा माटे संपादननो आ प्रथम ज प्रयत्न छे, ए पण पूज्यपाद गुरुभगवंत श्री विजयसूर्योदयसूरि महाराजनी आज्ञा थवाथी करेल छे. तेथी आमां जे कांइ क्षति-स्खलनादि होय ते विद्वानो क्षन्तव्य गणशे तेवी आशा छे.

★

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# शब्दार्थचन्द्रिका-सवृत्तिः

॥ श्री शङ्खेश्वरपार्श्वनाथाय नमः॥

॥ ऐँ नमः॥

॥ सकलभट्टारकपुरन्दर भट्टारक श्री ५ श्री विजयाणंदसूरीश्वरचरणकमलेभ्यो नमः ॥

ॐ[१] नमः सिद्धिसन्तान - दायिने परमात्मने।
श्रीमच्छङ्खेश्वराह्वान-पार्श्वेशाय महस्विने॥ १ ॥
श्री[२]वर्धमानस्संसिद्ध्यै वर्धमानमहोदयः।
स्ताद्विश्वविश्वविश्वेश-शक्रचक्रस्तुतक्रमः॥ २ ॥
हेतवे श्रेयसामेव पराय परमेष्ठिने।
विधूतरागद्वेषाय कारुण्यनिधये नमः॥ ३ ॥
सारदां सा(शा)रदां स्मृत्वा शारदेन्दुतनुप्रभाम्।
कर्पूरपूरन्यत्कार-कारिकीर्तिविराजिनीम्॥ ४ ॥
गुरुं श्री[३] विजयानन्दं विजयानन्ददायकम्।
नत्वा गौरीगुरुगिरि-ग्रावगौरगुणैर्गुरूम्॥ ५ ॥
बालानां बुद्धिबोधाय विनोदाय[४] च वाग्मिनाम्।
संक्षिप्तयुक्तिभिर्युक्ता गम्भीरार्थगरीयसी॥ ६ ॥

---

टि. १ - ॐमिति अवतीत्यौणादिके मप्रत्यये ज्वरतरेत्युठिगुणे स्वरादित्वादव्ययत्वे च सिद्धिः, तस्मै परमब्रह्मरूपायेत्यर्थः। अत्र धुरि मातृकायामिव ॐनमः इति पठितमन्त्रसिद्धमन्त्रोपन्यासः। प्रयोजनं चास्य निर्विघ्नमिष्टार्थसिद्धिरिति।

टि. २ - श्री वर्धमान इति श्रिया सकलत्रिभुवनजनमनश्चमत्कारकारिमनोहारि-परमार्हन्त्यमहामहिमाविस्तारि -

अशोकवृक्षः १ सुरपुष्पवृष्टिः २ दिव्यध्वनि ३ श्चामर ४ मासनं च।
भामण्डल (लं) ६ दुन्दुभि ७ रातपत्रं ८ सत्प्रातिहार्याणि जिनेश्वराणाम्॥

इति स्पष्टाष्टप्रातिहार्यशोभया चतुस्त्रिंशदतिशयविभूत्या वा समन्वितो वर्धमानः श्रीवर्धमानः।

टि. ३ - अयं श्री शब्दो महत्त्वप्रतिपादकः, पूज्यनामादौ लोके प्रयुज्यते।

टि. ४ - कुतूहलाय।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विचक्षणचकोरौघ-हर्षोत्कर्षविधायिनी।
व्याख्या सुधास्राविणी च पदार्थानां प्रकासि(शि)नी।।७।।
अज्ञानोग्रतमःस्तोम-प्रध्वंसनपटीयसी।
सुबोधाऽगाधजलधि-लोलकल्लोलवर्द्धनी।। ८।।
शब्दार्थचन्द्रिकाख्येयं शब्दशास्त्रेन्दुचन्द्रिका।
सारस्वताद्यसत्पद्य-द्वयवृत्तिर्वितन्यते।। ९।। (चतुर्भिः कलापकम्)
निजानुजज्ञश्रीसिद्धि-विजयस्याग्रहान्मया।
क्रियमाणप्रयत्नस्तान् मन्दधीबोधतत्फली।। १०।।

इह हि किल निश्शेषसविशेषस्फूर्जद्दुर्यपदार्थसार्थपरमार्थजिज्ञासूनां शिशूनां सम्यग्शब्दव्युत्पत्त्यवबोधाय स्वकीयकमनीयकुशाग्रप्रतिमनिष्प्रतिम प्रतिभाप्रभाप्राग्भार-पराभूतप्रबर्हबर्हिर्मुखाचार्यमानाभिमानैदंयुगीनचञ्चच्चतुरजनचेतश्चमत्कार करणाय य श्रीसारस्वतशब्दानुशासनादिमवृत्तद्वितयस्य व्याख्या संहितादिभेदेन षोढा प्रस्तूयते।

यदुक्तं पूर्वसूरिभिः शास्त्रान्तरे-

**संहिता ( १ ) च पदं ( २ ) चैव पदार्थः ( ३ ) पदविग्रहः ( ४ )**
**चालना ( ५ ) प्रत्यवस्थानं ( ६ ) व्याख्या तन्त्रस्य षड्विधा।।**

अस्यार्थः सुबोध एव। तथापि चाक्षरगमनिकानिगमनाप्तक्वचनवचनरचना रचित-सूचामात्रसूचनकृत् सूत्रसूत्रितभावार्थैकदेशो निरूप्यते।

**अयमस्यार्थः**- तन्त्रस्य व्याख्या षड्विधा भवति इति क्रियाकारक सण्टङ्कः। "यत्र अन्यत् क्रियापदं न श्रूयते तत्रास्तिभवन्तीत्यादि पुरः प्रयुज्यते" इति न्यायात् इति वृद्धवचनप्रमाण्याद्वा अत्र अनुक्तमपि 'भवति' पदं योजनीयम्।

यदाहुः-

**अह्ना विना न सूर्यः सूर्यविहीनश्च वासरो नास्ति।**
**कर्तृक्रिये तथैव हि संपृक्ते सर्वदा भवतः।। १।।**

इति। अत्र व्यारव्येति कोऽर्थः ? विशेषेण आख्यायते कथ्यतेऽधिकारात् अर्थ इति व्याख्या-व्याख्यानं, 'ख्या प्रकथने इति वचनात्। कस्य ? तन्त्रस्य। तन्यते विस्तार्यत इति तन्त्रं, तस्य तन्त्रस्य शास्त्रस्य।

तन्त्रं सिद्धान्ते राष्ट्रे च, परच्छन्दप्रधानयोः।
अगदे कुटुम्बकृत्ये च, तन्तुवाने परिच्छदे।।१।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुतिशाखान्तरे शास्त्रे करणे द्व्यर्थसाधके।

इति कर्तव्यता तन्वो ०॥ इति हैमानेकार्थकोश:॥

कतिधा ? इत्याह-षड्विधा। षट् षट्सङ्ख्याका: विधा: प्रकारा: अस्या इति षड् = विधा: षट् = प्रकारा:॥

**अयमभिप्राय:**- सर्वस्यापि शब्दानुशासनादिशास्त्रस्य व्याख्याया: षड्भेदा भवन्तीति भावार्थ:।

अथ ग्रन्थकारस्तान् भेदान् यथानुक्रमं व्यनक्ति-प्रकटयति। तत्र तावत् संहिता इति संज्ञाया: क: शब्दार्थ: ? संधीयते इति संहिता, अस्खलितपाठोच्चार इति यावत्। किमुक्तं भवति ?। अस्खलिततया मुखे सूत्रपाठोच्चारणं संहिता इति तात्पर्यम्। इति प्रथमो भेद: (१) ॥

**च**: पुनरर्थे। "पुनरर्थेपि किं च तु" इति हैमानेकार्थकोश:। च पुन:। **पदं** पदमित्यस्य कोऽर्थ: ? विभक्त्यन्तं पदम्।

विभज्यन्ते पृथक् क्रियन्ते कर्तृकर्मादयो यया सा विभक्ति:। सा विभक्ति: द्विप्रकारा। एका स्यादि:॥

सि औ जस् इति प्रथमा १
अम् औ शस् इति द्वितीया २
टा भ्याम् भिस् इति तृतीया ३
ङे भ्याम् भ्यस् इति चतुर्थी ४
ङसि भ्याम् भ्यस् इति पञ्चमी ५
ङस् ओस् आम् इति षष्ठी ६
ङि ओस् सुप् इति सप्तमी ७

एकैकस्या: विभक्तेस्त्रीणि त्रीणि वचनानि। एक वचन १ द्विवचन २ बहुवचन ३ संज्ञानि भवन्तीत्यादिरूपा।

अपरा त्यादि:।

| | |
|---|---|
| तिव तस् अन्ति | ते आते अन्ते |
| सिव् थस् थ | से आये ध्वे |
| मिव् वस् मस् | ए वहे महे |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि दशलकारस्वरूपा। ते च के दश लकाराः ? इत्याकांक्षायामाह- वर्तमाना १ विधिसम्भावना २ आशीः प्रेरणा ३ अनद्यतनी ४ परोक्षार्थ ५ आशीरर्थ ६ श्वस्तन्यर्थ ७ भविष्यति ८ क्रियातिपत्ति ९ भूतार्थ १० लक्षणा ज्ञेयाः।

अत्र पाणिनीयानां मतमाह-

" लट् १ लिङौ, च लोट् ३ लङौ ४ च
लिट् ५ लिडौ ६ लुट् लृय ८ तथा।
लृङ् ९ लुडा १० वपि विद्वद्भिः
लकारा दश विस्मृताः॥ १॥ इति॥

तत्र विभक्तिद्वयमध्ये स्यादिविभक्तिर्नाम्नोऽग्रे प्रयोज्यते। त्यादिविभक्तिर्धातोरग्रे स्थाप्यते। सा विभक्तिः अन्ते यस्य तद् विभक्त्यन्तं, यस्यान्ते विभक्तिस्तत् पदमुच्यते। तद्व्यतिरिक्तं नाम। यतः "अविभक्ति नाम-विभक्तिरहितं धातुवर्जं चार्थवच्छब्दरूपं नामोच्यते"। अस्य व्याख्या-विभक्त्या रहितं धातोर्भ्वादेः पृथग्भूतं अर्थयुक्तं शब्दरूपं एकादिवर्णरूपं तन्नामोच्यते।

अथास्य पदकृत्यानि। "शब्दरूपं नाम" इत्येवास्तु, इत्युक्ते पदस्यापि नामसंज्ञा स्यात् तन्निवारणार्थमविभक्तीति पदमुपादीयते। तथा सति धातावतिव्याप्तिस्तन्निवारणार्थं धातुवर्जमिति तथा सति निरर्थकस्य टस इत्यादेर्ध्वनेर्नामत्वं सम्भवति तन्निवारणार्थं अर्थवदिति। ईदृग्लक्षणं नाम । तथा कृत्तद्धितसमासाश्चेत्युक्तत्वात् च पुनः कृत्तद्धितसमासा अपि नामसंज्ञकाः स्युः। "प्रत्ययग्रहणे प्रत्ययान्तस्य ग्रहणम्" इति न्यायात् कृच्छब्देन कृदन्तधातूनां ग्रहणम्। कृदन्ता ये धातवः तद्धितसमासयोः पदानि नामसंज्ञानि भवन्तीत्यर्थः।

केचित् पाणिनीयाचार्या इति वदन्ति। "एते सर्वेऽपि प्रातिपादिकसंज्ञका" इति। तन्मते प्रातिपादिक इति नामपर्यायः । तस्मान्नाम्नः पराः स्यादयः सप्त विभक्तयो भवन्ति। तदन्तं पदमेवेति तात्पर्यार्थः। इति द्वितीयो भेदः॥ २॥

इतोऽग्रे पश्चिमं भेदं यावद् देहलीप्रदीपन्यायेन डमरुकमणिन्यायेन वा चकारो मध्यवर्तित्वात् सर्वत्रापि सम्बध्यत इति। **च** पुनः । **एव** निश्चये । ततः **पदार्थः** । पदानां पूर्वोक्तानां अर्थः पदार्थ अर्थग्रहणच्चान्योऽपि गृह्यते । अन्वितान्येव पदान्यर्थसमर्पकाणि भवन्ति। इति तृतीयो भेदः॥ ३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**च** पुनः। **पदविग्रहः**। पदानां विग्रहः पदविग्रहः। विग्रह इति कोऽर्थः ? अन्वययोग्यार्थसमर्पकः पदसमुदायो विग्रहो वाक्यमिति। परस्परसापेक्ष-पदैकार्थीभावोऽन्वयस्तस्य अन्वयस्य योग्यो योऽसावर्थस्तस्य समर्पकः समर्थको यः पदसमुदायः-पदसमूहः स विग्रहः । तस्यापरं नाम वाक्यमित्यर्थः। अत्र विग्रहशब्देन समास एवोच्यते। समासापरपर्यायो विग्रह इति वचनात्। समास इति किम् ?। समस्यते संक्षिप्यते अर्थो येन स इति समासः। यद्वा समसनं अनेकेषां पदानामेकपदीकरणं स समासः। तेन द्वयोर्नाम्नोः बहूनां च नाम्नां समासो भवति। अत्र नामशब्देन पदमेव विवक्षितं, अन्यथा अविभक्ति नाम इत्युक्ते "समासप्रत्यययो" रिति सूत्रं व्यर्थं स्यात्। तस्मान्नामशब्देन पदमेवेति भावः। स च नाम्नामन्वययोग्यत्वे सत्येव समासो भवति। यत्र नाम्नां पदीनामन्वययोग्यत्वं सम्भवति राजपुरुष इत्यादौ तत्रैव समासो भवति नान्यत्रेति। च शब्दात्तद्धितोऽपि। तद्धितप्रत्ययसम्बन्धिविग्रहोऽप्यन्वययोग्यत्वे सत्येव भवति। अन्वययोग्यता नाम पदानां मिथः सामर्थ्यम्। ततो भार्यापुरुषस्येत्यादौ क्रम-वैपरीत्येनान्वययोग्यत्वाभावात् समासो न भवति, एवं देवदत्तस्य भार्या, पुरुषस्य वस्त्रमित्यत्र भार्यापुरुषयोः सापेक्षत्वाभावात् न समासः।

ननु विभक्त्यन्येव पदानि प्रयोक्तव्यानि किं समासेन ? इति समासप्रयोजनमाह-ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वं च समासप्रयोजनमिति। एकं पदं-एकपदं तस्य भावः ऐकपद्यम्। द्वयोः पदयोः बहूनां वा पदानां समासे कृते एकपदभावो भवति तदैकपद्यम्, इत्येकं प्रयोजनम्। तथा एकस्वरस्य भाव ऐकस्वर्यम्। समासे कृते वेदे अनेकेषु स्वरेषु एक उदात्तादिः स्वरो दीयत इति द्वितीयप्रयोजनम्। ऐकपद्याच्च शरवणादौ णत्वमिति। तथा एका विभक्तिर्यत्र तदेकविभक्तिकं तस्य भाव एकविभक्तिकत्वं समासस्य प्रयोजनमिति। समासे हि पृथक्पदानां विभक्तिलोपादेकविभक्तिकत्वं भवति। यथा-शशाश्च कुशाश्च पलाशाश्च शशकुशपलाशमिति तृतीयं प्रयोजनम्। यतः

"विभक्तिः लुप्यते यत्र तदर्थस्तु प्रतीयते।
ऐकपद्यं पदानां च स समासोऽभिधीयते॥ १॥

इति समासलक्षणम्।

स च षड्विधः। अव्ययीभाव १ स्तत्पुरुषो २ द्वन्द्वो ३ बहुव्रीहिः ४ कर्मधारयो ५ द्विगुश्च ६ इति । एवं समासः षड्विधो ज्ञेयः। तत्र पूर्वपदप्रधानोऽव्ययीभावः। पूर्वं पदं अव्ययलक्षणं प्रधानं यत्र सः पूर्वपदप्रधानः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विगु-तत्पुरुषौ परपदप्रधानौ। पूर्वोत्तरयोः पदयोर्मध्ये यत्परं अग्रेतनं पदं तत्प्रधानं ययोस्तौ० [परपदप्रधानौ] ।

द्वन्द्व-कर्मधारयौ चोभयपदप्रधानौ। उभे पूर्वापरे पदे प्रधाने ययोस्तौ० [उभयपद प्रधानौ] ।

बहुव्रीहिरन्यपदप्रधानः। पूर्वोत्तराभ्यां पदाभ्यां अन्यत् यत्किञ्चित् बहिः स्थितं पदं यत्पदवाच्यं प्रधानं यस्मिन् सः।

कस्मात् ?, तस्य क्रियाभिसम्बन्धात्। अस्य व्याख्या यथा-'तस्य क्रियाभिसम्बन्धात्' इति पदं सर्वत्रापि योज्यम् । तत्र तत्र तस्य तस्य पदस्य क्रियाभिः सहाभिसम्बन्धात् क्रियायोगित्वेन प्राधान्यादित्यर्थः।

अव्ययीभावः - पूर्वपदप्रधानः। यथा-स्त्रीषु अधि इति 'अधिस्त्रि गृहकार्य भवती'त्यत्र क्रियायाः पूर्वपदेनाधीत्यव्ययेन सह सम्बन्धात् तस्य प्राधान्यात् अव्ययीभावः पूर्वपदप्रधानः। तथा द्विगुस्तत्पुरुषश्च एतौ परपदप्रधानौ, यथा पञ्चानां गवां समाहारः पञ्चगवमित्यत्र पञ्चन् शब्दस्य सङ्ख्याभूतस्य विशेषणत्वं, गोशब्दस्य विशेष्यत्वम्। विशेष्यविशेषणयोः मध्ये विशेष्यस्य मुख्यत्वमिति गोशब्दस्य परपदस्य प्रधानत्वम्। तथा तत्पुरुषसमासे राजपुरुषो याति इत्यत्र गमनक्रियायाः पुरुषेण सहान्वयात् तस्यैव प्राधान्यमेवं तत्पुरुषे परपदस्य प्राधान्यम्। एवं द्विगुतत्पुरुषयोः परपदस्य क्रियाभि-सम्बन्धात् द्विगुतत्पुरुषौ परपदप्रधानौ। तथा द्वन्द्वे कर्मधारये चोभयपदयोः क्रियाभि-सम्बन्धात् द्वन्द्वकर्मधारयौ उभयपदप्रधानौ यथा-अग्निश्च सोमश्च इत्यादिषु पदद्वयस्यापि क्रियायामधिकारित्वात् द्वन्द्वे उभयपदयोः प्राधान्यम्। तथा कर्मधारये नीलं च तदुत्पलं चेत्यत्र विशेषणविशेष्ययोरेकार्थनिष्ठत्वादन्योन्याश्रयभूतत्वाच्च पदद्वयस्य प्राधान्यम्। बहुव्रीहौ चान्यपदस्य प्राधान्यम्। यथा-बहु धनं यस्येत्यत्र बहुधनस्य वस्तुभूतत्वं यच्छब्दस्य तु स्वामित्वमिति अन्यपदस्य प्राधान्यम्। तस्यान्यपदस्य क्रियाभिसम्बन्धादिति समासार्थः।

**अथोपसंहारमाह-**

पूर्वेऽव्ययेऽव्ययीभावोऽमादौ तत्पुरुषः स्मृतः।
चकारबहुलो द्वन्द्वः सङ्ख्यापूर्वो द्विगुर्मतः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्य येन बहुव्रीहिः स चासौ कर्मधारयः।
इति किञ्चत्समासानां षण्णां लक्षणमीरितम्॥२॥ इति।

**अन्यैरप्युक्तम्**-

यदा बहुव्रीहि[१] रुदीरितो बुधै र्द्वन्द्व[२]श्चकारैरथसङ्ख्यया द्विगुः[३]।
चासौ च तत्स्यादिति कर्मधारयः[४] क्लीबोऽव्ययी[५] तत्पुरुषो[६]ऽन्यलक्षणः॥१॥

इति समासानां समासतो लक्षणं प्रोक्तम्। एतेषां विस्तरस्तु ग्रन्थान्तरतो विज्ञेयः।

अथ षण्णामपि समासानां किञ्चिद्विशेषलक्षणं वृत्तद्वयेनोच्यते । यदुक्तम्-

द्वन्द्वश्चकारैः समनामविग्रहा-दाद्योत्तरास्तत्पुरुषे विभक्तयः।
चाभ्यां समस्येत विशेषणैर्गुणी तदान्तरस्थेन च कर्मधारये॥
प्रायो बहुव्रीहिरयं गुणैर्गुणी यदा समस्तान्यविशेषणं भवेत्।
सङ्ख्याद्यपुंस्त्येकतया पदं द्विगु रूपादिपूर्वं तदमन्तमव्ययी॥२॥ (युग्मम्)

अनयोर्वृत्तयोर्व्याख्या-समयोर्नाम्नोः समानां वा नाम्नां विग्रहः समनामविग्रहः, तस्मात् चकारैर्द्वन्द्व समासः स्यात्।

उभयपदप्रधानो द्वन्द्वः। स च द्विविधः। इतरेतरद्वन्द्वः १ समाहारद्वन्द्वश्च २ ॥ पूर्वस्मिन् द्विवचनं बहुवचनं वा। लिङ्गं तु परवर्तमानशब्दापेक्षम्। यथा-घटश्च पटश्च-घटपटौ। घटश्च पटश्च लकुटश्च-घटपटलकुटाः। घटश्च घटी च घटघट्यौ । चार्थे द्वन्द्व० इति सूत्रेण समासः।

समाहारे तु क्लीबत्वमेकवचनम्।
यथा-सुखं च दुःखं च - सुखदुःखम्।
दधि च घृतं च - दधिघृतम्।
आरा च शस्त्री च आराशस्त्रि।

**यदुक्तम्** -

स स्यात् द्वन्द्व-समाहारो यत्रैकवचनं भवेत्।
यत्र द्वित्वं बहुत्वं च स भवेदितरेतरः॥ १॥ इति ।

अवयवार्थप्रधान इतरेतरः । समुदायार्थप्रधानः समाहारः।

इति द्वन्द्वसमासः॥१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्योत्तरा: प्रथमादिका विभक्त्यस्तत्पुरुषे भवन्ति। उत्तरपदप्रधानःतत्पुरुषः। तत्र पूर्वपदे सप्तापि विभक्त्यः स्यु । उत्तरपदे प्रायः प्रथमैव।

यथा - शोभनो राजा - सुराजा।

पूजितो राजा - सुराजेत्यर्थः।

"उपसर्गा: क्रियायोगे गतिश्च प्रादयोऽपि"। तथा "प्रादयो गताद्यर्थे प्रथमया अमादा"वित्यस्येत्येवं प्रपञ्चेत्यनेन समासः।

यथा - धर्मं श्रितो - धर्मश्रितः।

मदेन पटुः - मदपटुः।

जीवेभ्यो हितम् - जीवहितम्।

जनेभ्यः सुखम् - जनसुखम्।

वृकाद् भयम् - वृकभयम्।

राज्ञः पुरुषो - राजपुरुषः।

समरे सिंह इव - समरसिंहः।

"अमादौ तत्पुरुष" इति सूत्रेण समासः। उत्तरपदे प्रायः प्रथमेति प्रायोवचनात् क्वचित् प्रथमाद्या: विभक्तयो यथासूत्रमुत्तरपदेऽपि स्यु। अन्यपदार्थे प्रधानत्वं च।

यथा - प्रगत आचार्यः प्राचार्यः।

प्रकृष्टो वीरः प्रवीरः। (१)

अतिक्रान्तः खट्वाम् अतिखट्वः। (२)

अवक्रुष्टः कोकिलया अवकोकिलः। (३)

परिग्लानोऽध्ययनाय पर्यध्ययनः। (४)

निर्गतः कौशाम्ब्या निष्कौशाम्बिः। (५)

एषु सर्वेषु क्वचिदमाद्यन्तस्य परत्वमिति सूत्रेण समासः।

कुम्भं करोतीति कुम्भकारः। "नाम्नश्च कृता समास" इति सूत्रेण समासः। न गौः अगौः। "नञि" इति सूत्रेण समासः।

प्राचार्यादयो नित्यसमासा अस्वपदविग्रहत्वात्। इति तत्पुरुष समासः॥ २

**चाभ्याम्०**॥ व्याख्या- तदा तच्छब्देनान्तरस्थेन प्रसिद्धया तु अदःशब्देन, चाभ्यां च चकाराभ्यां द्वाभ्यां विशेषणैः सह, गुणी विशेष्यं कर्मधारये समस्यते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उभयपदप्रधानः कर्मधारयः। पूर्वं विशेषणपदम्, अग्रे विशेष्यपदम्।

यथा-त्रिषु लिङ्गेषु-वीरश्चासौ पुरुषश्च-वीरपुरुषः (१)

मधुरा चासौ वाणी च - मधुरवाणी। (२)

नन्दनं च वनं च - नन्दनवनम्। (३)

"कमधारयस्तुल्यार्थे" इति सूत्रेण समासः ।

स्त्रीपूर्वपदस्य तु पुंवद्वेति पुंवत्त्वम्। इत्यादि कर्मधारयः।।३।।

इति प्रथमवृत्तार्थः।।१।।

**अथ बहुव्रीहिः-**

**प्रायो०** । व्यारव्या - गुणैर्विशेषणैर्गुणी विशेष्यं यदा यच्छब्देन समस्तः सन्नन्यविशेषणं यत्र भवेत्, सोऽयं बहुव्रीहिः समासः स्यात्। बहुव्रीहिरन्यपदप्रधानः। द्वितीयाद्या षड् विभक्तयो यच्छब्दे स्युः। अन्यविशेषणत्वात् तल्लिङ्गवचने च भवतः।

यथा - आरूढो वानरो यं सं आरूढवानरो वृक्षः। १

जितो मोहो येन स जितमोहो जिनः। २

दत्ता दक्षिणा यस्मै स दत्तदक्षिणो द्विजः। ३

वीतो गतो रागो यस्मात् स वीतरागः सर्वज्ञः। ४

शीता रश्मयो यस्य सः शीतरश्मिः। ५

प्रादुर्भूता अङ्कुरा यस्यां सा प्राद्भुर्भूताङ्कुरा। ६

एतेषु सर्वेषु बहुव्रीहिरन्यार्थ इति सूत्रेण समासः । ७

इति बहुव्रीहिसमासः।।८।।

अथ द्विगुसमासः।

**सङ्रव्याद्यपुंस्त्र्येकतया पदम्०**। व्यारव्या- द्विगौ द्विगुसमासे पदमुत्तरपदं स्यात्। कीदृशं सङ्रव्यादि- सङ्रव्यावाचिपदं विशेषणभूतमादौ यस्य तत्सङ्रव्यादि। एवं विधमुत्तरपदं विशेष्यभूतं स्यात्। पदद्वयमपि षष्ठ्यन्तं समाहारशब्देन समस्यते। कया ? पुंस्त्र्येकतया-अपुमान् क्लीबलिङ्गं स्त्रीलिङ्गं च तयोरेकतया एकवचनतया नपुंसकलिङ्गं स्त्रीलिङ्गं वैकवचनान्तं समासः स्यादित्यर्थः । पुंलिङ्गं तु न स्यादेवेति उत्तरपदप्रधानो द्विगुः । शेषः सर्वः क्लीबलिङ्गः।

यथा - त्रयाणां लोकानां समाहारः त्रिलोकी।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समाहारे " अत ईप् द्विगु " इति सूत्रेण ईप्।

तिसृणां सन्ध्यानां समाहारः त्रिसन्ध्यम्।

त्रिसन्ध्यस्य क्लीबत्वमेव। एकत्वे द्विगुद्वन्द्वाविति सूत्रेण समासः।

त्रयाणां भुवनानां समाहारः त्रिभुवनम्।

इत्यादि। पात्रादिगणपाठान्नपुंसकत्वम्।

द्वयोः साध्वोः समाहारः द्विसाधु।

तिस्रो नद्यः समाहृता त्रिनदि। एवं पञ्चसमिति। इति द्विगुसमासः॥ ५

अथाव्ययीभावः।

**उपादिपूर्वं तदमन्तमव्ययी०**। व्याख्या - उपादिशब्द आदौ येषामव्ययानां शब्दानां ते उपादयः अव्ययशब्दास्ते पूर्वं पूर्वपदं यत्र तत् उपादि। पूर्वमेवंविधं तत्पूर्वोक्तं पदमुत्तरपदं भवति। कीदृशम् ?, अमन्तम् । सर्वविभक्तीनामकारान्तात् प्रायोऽमादेशः स्यात्। सोऽम् अन्ते समासान्ते यस्योत्तरपदस्य तदमन्तमेवंविधं यत्रोत्तरपदं भवति, सोऽव्ययी। अव्ययं पूर्वपदं यस्य सोऽव्ययी। अव्ययीभावसमास इत्यर्थः। पूर्वेऽव्ययेऽव्ययीभावः।

यथा - कुम्भस्य समीपम् उपकुम्भमस्ति १ पश्य २ क्रुध्यति ४ शोभा ६।

क्रमेण प्रथमाद्वितीयाचतुर्थीषष्ठीनां "आतोऽमनत" इत्यमादेशः।

तृतीया-सप्तम्योस्तु वा टाङ्यो इति सूत्रेणामादेशो वा।

यथा उपकुम्भं कृतं, उपकुम्भेन कृतम्।

उपकुम्भं शेते, उपकुम्भे शेते इति।

पञ्चम्यां त्वमादेशाभावे उपकुम्भादानयेति।

आकारान्तशब्दान् विनान्यस्वरान्तव्यञ्जनान्तशब्देभ्यो विभक्तिलोप एव स्यात्।

यथा - स्त्रीषु अधि अधिस्त्रि।

साधोः समीपम् उपसाधु।

नद्याः समीपम् उपनदि।

भवतः समीपम् उपभवत्।

भवत्याः समीपम् उपभवति।

सुखस्यानतिक्रमेण यथासुखम्। " यथा सादृश्ये " इति सूत्रेण समासः। इत्यव्ययीभावसमासः॥ ६॥ इति द्वितीयवृत्तार्थः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि समासलक्षणमिति चतुर्थो भेदः। (४)

ततो विग्रहविधानानन्तरं च पुनः चालना कर्तव्या। इह चालनेति कोऽर्थः ? चल्यते स्फूर्जत्तीक्ष्णमनीषया विचार्यते इति चालना । अयमाशयः- विवक्षितार्थसमर्थनाय कण्टकोद्धारादिहेतोः। अयमर्थः- कथं सञ्ज्ञाघटीतीति पूर्वक्षोद्भावनं यत्र विधीयते सा चालना। इति पञ्चमो भेदः।। ५

च पुनस्ततः प्रत्यवस्थानम् - अर्थं अर्थं प्रति अवस्थानम् निश्चयः प्रत्यवस्थानम्। अत्र इदमेव घटते इति संशयनिरासेन पूर्वोक्तलक्षणायाश्चालनायाः यत्र सिद्धान्तोद्भावनं क्रियते तत् प्रत्यवस्थानं तदर्थसमर्थनमित्याशयः स्वयमभ्यूह्यः । इति षष्ठो भेदः॥ ६

इत्यलं प्रपञ्चेनेत्याद्यर्थयोजना। (१)

चञ्चद्वर्णसुसंहिता स्फुटपदा नानापदार्थप्रदा।
विज्ञश्लाघितविग्रहा समुचितस्थानं स्फुरच्चालना॥
व्यारव्याक्रमगवी चिरं विजयतां सत्प्रत्यवस्थानयुक्।
स्निग्धं गोरसमर्पयत्यनुदिनं हृद्यस्य पद्यस्य मे॥ २ ॥

इति श्रीमत्तपागच्छाधिराज श्रीगौतमगणधरोपमगुणसमाजसकलभट्टारक वृन्दारक राजभट्टारक श्री ५. श्री विजयाणंदसूरीश्वरशिष्यभुजिष्य पं.हंसविजयगणि समर्थितायां शब्दार्थचन्द्रिकायां संहितादिषड्भेदस्वरूपनिरूपकपद्यस्य व्यारव्यादिग् सम्पूर्णा॥१॥

(प्रतिप्रान्ते) अर्हँ नमः। ह्रीँ नमः। ॐ नमः।

* * *

टि-१. प्रमाणानव बाधितोऽर्थ सिद्धान्तः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# बे सरस्वती-स्तोत्र

-सं. मुनि रत्नकीर्तिविजय

विद्यानां तथा श्रुतज्ञानना अधिष्ठात्री माता सरस्वती देवीनां बे अप्रसिद्ध स्तोत्ररत्नो यथामति संपादित करी अत्रे रजू करतां हर्षानुभव करुं छुं. बालमति छतां पूज्य गुर्वाज्ञाथी दोरवाईने आ साहस कर्युं छे, तेथी बालसुलभ क्षतिओ क्षन्तव्य गणवानी मनीषिजनोने विज्ञप्ति छे. प्रथम स्तोत्रनी बे पत्रनी एक प्रति मळेल छे, जे अनुमानतः १५ मा शतकनी लखायेली जणाय छे. प्रान्ते "जानी मेघेन लिखितम् " एम लेखकनो निर्देश छे, पण संवत्‌नो, रचना संवत्‌नो के कर्तानो निर्देश नथी. समग्रपणे स्तोत्रनो भाव तपासतां कोई योगमार्गना साधकनी आ मंत्र-यंत्रनी विशिष्ट आम्नायगर्भित रचना छे, तेम पूज्योथी जाणवा मळ्युं छे. स्तोत्र निःशंक प्रभावपूर्ण लागे छे. छठ्ठा पद्यमांना 'निर्ग्रन्थ' पद परथी कोई जैन कर्तानी रचना होय तो ते असंभवित नथी.

बीजुं स्तोत्र 'जिनवाक्स्तुति" नामे छे. ते मुख्यत्वे जैन आम्नाय प्रमाणेना सरस्वती -श्रुतदेवीना स्वरूपनुं , नामोनुं तथा गुणनुं वर्णन करे छे. ते एक साव नाना प्रकीर्ण पत्रमां लखायेलुं छे, जे पत्र संभवतः १८ मा सैकानुं जणाय छे. एमां पण पत्रमां के रचनामां कर्तानो उल्लेख छे नहि. रचना प्रगल्भ जणाय छे.

१

**( श्री शारदायै नमः ॥ )**

अन्तः कुण्डलिनिप्रसुप्तभुजगाकारस्फुरद्विग्रहां,
शक्तिं कुण्डलिनीं विधाय मनसा हुंकारदण्डाहताम्।
षट्चक्राणि विभिद्य सद्य मनसां प्रद्योतनद्योतनीं,
लीनां ब्रह्मपदे शिवेन सहितामेकत्र लीनां स्तुमः॥१॥

कन्दात्कुण्डलिनि ! त्वदीयवपुषा निर्गत्य तन्तुत्विषा,
किञ्चिच्चुम्बितमम्बुजं शतदलं तद्ब्रह्मरन्ध्रादधः।
यश्चन्द्रद्युति ! चिन्तयत्यविरतं भूयोऽत्र भूमण्डले,
तन्मन्ये कविचक्रवर्त्तिपदवीच्छत्रच्छलाद्वल्गति॥ २॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्त्वद्वक्त्रमृगाङ्कमण्डलमिलत्कान्तिप्रतानोच्छलत,
चञ्चच्चन्द्रकचक्रचित्रितककुप्कन्याकुलं ध्यायति।
वाणी वाणिविचित्रभङ्गुरपदप्रागल्भयशृङ्गारिणी,
नृत्यत्युन्मदनर्त्तकीव सरसं त्वद्वक्त्ररङ्गाङ्गणे॥ ३॥

देवि ! त्वत्पदचन्द्रकान्तकरकश्च्योतत्सुधानिर्झर-
स्नानानन्दतरङ्गितः पिबति यः पीयूषधारारसम्।
तारालङ्कृतचन्द्रशुक्तिकुहरेणाकण्ठमुत्कण्ठितो,
वक्त्रेणोद्गिरतीव तं पुनरसौ वाणीविलासच्छलात्॥ ४॥

क्षुभ्यत्क्षीरसमुद्रनिर्गतमहाशेषाहिलोकात्फणा
पत्रोत्त्रिद्रसितारविन्दकुहरे ! चन्द्रस्फुरत्कर्णिके !।
देवि ! त्वां च निजं च पश्यति वपुर्यः कान्तिभिन्नान्तरं,
ब्राह्मि ! ब्रह्मविदस्य वल्गति वचःप्रागल्भ्यदुग्धाम्बुधे !॥५॥

नाभीपाण्डुरपुण्डरीककुहरे हृत्पुण्डरीके गल-
त्पीयूषद्रक(व)वर्ष(षि)णि ! प्रविशतीं त्वां मात्रिकामालिनीम्।
दृष्ट्वा भारति ! भारती प्रभवति प्रायेण पुंसो यया,
निर्ग्रन्थोऽपि शतान्यपि ग्रथयति ग्रन्थायुतानां नरः॥६॥

त्वां मुक्तामयसर्वभूषणधरां श्वेताम्बराडम्बरां,
गौरीं गौरिसुधां तरङ्गधवलामालोक्य हृत्पङ्कजे।
वीणापुस्तकमौक्तिकाक्षवलयश्वेताब्जवल्गत्करां,
न स्यात्कः शुचिवृत्तचक्ररचनाचातुर्यचिन्तामणिः॥

अश्येत्स्वां तनुमिन्दुमण्डलगतां त्वां चाभितो मण्डितां,
यो ब्रह्माण्डकरण्डपिण्डितसुधाडिण्डीरपिण्डैरिव।
सुस्वच्छोद्गतिगद्यपद्यलहरीलीलाविलासामृतैः,
सानन्दास्तमुपाचरन्ति कवयश्चन्द्रं चकोरा इव॥ ८॥

तद्वेदान्तशिरस्तदोंकृतिमुखं ज्योतिःकलालोचनं,
तत्तद्वेदभुजं तु(त)दात्महृदयं तद्गद्यपद्यांह्रि च।
यस्त्वद्वर्ष्म विभावयत्यविरतं वाग्देवि ! तद्वाङ्मयं,
शब्दब्रह्मणि निष्ठितः स परमब्रह्मैक्तामश्नुते॥९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाग्बीजं स्मर बीजवेष्टितमतो ज्योति:कलाभृद्बहि-
रष्टद्वादशषोडशद्विगुणितद्विष्टाब्जपत्रान्वितम्।
तद्बीजाक्षरकादिवर्णरचितान्यग्रे दलस्यान्तरे,
हंसः कूड(ट)युतं भवेदवितथं यन्त्रं तु सारस्वतम्॥ १०॥

ॐ ह्रीँ श्रीँ स[ह] ह्रीँ सबीजकलितां वाग्वादिनीदेवतां,
गीर्वाणासुरपूजितामनुदिनं काश्मीरदेशे भवाम्।
अश्रान्तं निजभक्तिशक्तिवशतो यो ध्यायति प्रस्फुटं,
बुद्धिज्ञानविचारसारमहितः स्याद्देव्यसौ साम्प्रतम् ॥११॥

स्मृत्वा यन्त्रं सहस्रच्छदकमलमनुध्याय नाभीहृदोत्थं,
चेत:स्निग्धोर्द्धनालं हृदि च विकचितां बाष्पनिर्यातना स्यात्।
तन्मध्ये चोर्ध्वरूपामभयदवरदां पुस्तकाम्भोजपार्णी(णिं),
वाग्देवीं तन्मुखाच्च स्वमुखमनुगतां चिन्तयेदक्षरालीम् ॥१२॥

किमिह बहुविकल्पैश्चिन्तितैर्यस्य कण्ठे,
लुठति विमलवृत्तस्थूलमुक्तावलीयम्।
भवति भवति नाथे भव्यभाषाविशेषै-
र्मधुरमधुसमृद्धस्तस्य वाचां विशेषः॥१३॥

*

इति श्री भारतीस्तवनं सम्पूर्णम्॥

*

---

**प्रशस्तिः** यदक्षरपरिभ्रष्टं स्वरव्यञ्जनवर्जितम्।
तत्सर्वं क्षमतां देवि ! प्रसीद परमेश्वरि॥

*

जानीमेघेन लिखितम्। सुमतिधीरगणिपठनार्थम्॥ श्री॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२

**( श्रीमदर्हद्वाण्यै नमः । )**

सर्व्वज्ञवाणी जयतात्सर्वभाषामयी शुभा।
पञ्चत्रिंशद्गुणोपेता मनुपूर्वस्वरूपिणी॥ १॥
दयामय्यमृतमयी वाग्देवी श्रुतदेवता।
संसृष्टिविगमध्रौव्यदर्शिका भुवनेश्वरी॥ २॥
ब्रह्मबीजध्वनिमयी श्रीमती वाग्भवात्मिका।
ज्ञानदर्शनचारित्ररत्नत्रितययदायिका॥ ३॥
अर्हद्वक्त्राब्जसम्भूता भव्यकैरवचन्द्रिका।
नयप्रमाणगम्भीरा नवतत्त्वगमान्विता॥
वाग्वादिनी भगवती कुमतिध्वंसकारिणी।
स्याद्वादिहृदयाम्भोजस्थायिनी मातृकामयी॥ ५॥
नित्या सरस्वती सत्या ज्योतीरूपा जगद्धिता।
वागीश्वरी सिद्धिदात्री सिद्धबीजमयी परा॥ ६॥
परमैश्वर्यसहिता गणभृद्गुम्फिता श्रुते।
(४).४ 'ललति', 'ललते' (= रमे छे, क्रीडामग्न होय छे) 'महाभारत'मां वपरायो छे. (ह्विट्नी Roots, Verb forms and Primary Derivatives of the Sanskrit Language, 1885, पुनर्मुद्रण १९६३, टर्नरनो कोश, क्रमांक १०९६८)

ह. भा.

**पूर्ति :** (१) 'मन'ना जूनी गुजरातीना प्रयोगो माटे जुओ जयंत कोठारी, 'मध्यकालीन गुजराती शब्दकोश'. 'मन'मां निषेधवाचक 'म'नी साथे भारवाचक 'न' जोडायो छे. हिन्दीमां 'करो-न' जेवा प्रयोगोमां जे अनुरोध के आग्रहनो वाचक 'न' छे (गुजरातीमां 'ने' छे) ते ज आ होवानुं जणाय छे.

(२) 'कत्तावा सुरपुरि गया' एवा हस्तप्रतना पाठने सुधारी, शब्दविभाग जुदी रीते करवाथी 'कित्ता वासर पुरि गया' एम वांचवानुं सूचन योग्य छे, पण पाठ भ्रष्ट होईने 'केता' एवुं रूप होवानुं मानवुं जोईए. जूनी गुजरातीमां ए ज रूप जाणीतुं छे.

ह. भा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# नवप्रकाशित साहित्यनो परिचय

Indian Logic : A study of Jayanta Bhaṭṭa's Nyāyamañjarī : Part II-Nagin J. Shah. Sanskrit - Sanskriti Granthmālā 3. 1995. 23 Valkeshvar Society, Ambawadi, Ahmedabad-380015. pp. 12+224. Rs. 225/-

डॉ. नगीन शाह घणां वरसथी काश्मीरी मूर्धन्य पंडित जयंत भट्ट (ईसवी नवमी शताब्दीनो अंत, दसमीनो आरंभ)नी 'न्यायमञ्जरी'नुं अध्ययन करता रह्या छे. 'न्यायमञ्जरी'नां विविध आह्निकोनो तेमनो गुजराती अनुवाद प्रसिद्ध थतो रह्यो छे. प्रस्तुत पुस्तकमां तेमणे प्रत्यक्ष, अनुमान, उपमान, शब्दप्रमाण, स्वत:प्रामाण्य अने परत:प्रामाण्यनो ईश्वरनी सत्ता, शब्दनी नित्यता-अनित्यता-ए विषयोने लगता 'न्यायमञ्जरी'ना बीजा अने त्रीजा आह्निकनुं अध्ययन आप्युं छे. परिशिष्टमां धर्मकीर्तिनो प्रमेयविचार अने पूर्वकालीन न्यायवैशेषिक दर्शनमां थयेल ईश्वरविचारनुं तारण आप्युं छे. भारतीय दर्शनना अभ्यासीओने डॉ. शाहनुं आ गंभीर अने विशद अध्ययन अत्यंत उपयोगी नीवडशे.

*

जैन दर्शन अने सांख्य-योगमां ज्ञान-दर्शन-विचारणा. जागृति दीलीप शेठ. संस्कृत-संस्कृति ग्रंथमाला २. १९४५, पृ १६+२०० रू.१५०.

ज्ञान अने दर्शननुं स्वरूप, तेमनी वच्चेनो संबंध, आध्यात्मिक विकासमां तेमनुं योगदान वगेरे विशे भारतीय दार्शनिकोनुं चिंतन बहुमूल्य छे. आ पुस्तकमां लेखिकाए मुख्यत्वे जैनदर्शन अने सांख्ययोगमां ए विषयोनी जे विचारणा थई छे तेनो तुलनात्मक अभ्यास कर्यो छे. ते साथे बौद्ध दर्शन, उपनिषदो, गीता अने न्यायवैशेषिक दर्शनमां पण ए विषयोनी जे विचारणा थई छे ते पण निरूप्युं छे. आ अभ्यास मूळ संस्कृत, प्राकृत, पालि ग्रन्थोने आधारे करेलो छे. अर्थघटन करवामां ते ते दर्शननी विचारणा साथे संवादिता रखाई छे, अने आचार्योना मतविरोधनो परिहार करवानो पण प्रयास कर्यो छे. **(नगीन शाहना प्रास्ताविकने आधारे)**

*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Ludwig Alsdorf and Indian Studies. Edited by Klaus Bruhn, M. Duckwitz, A. Wezler. Motilal Banarsidass. 1990, pp. 12+120. Rs. 150.

वीशमी सदीना पाश्चात्य भारतविदोमां जर्मन विद्वान लुड्विग आल्स्डोर्फ (१९०४-१९७८) सर्वमां अग्रणी एक सर्वतोमुखी संशोधक गणावी शकाय तेवा हता. वैदिक, बौद्ध, जैन, अर्वाचीन भारतीय, संस्कृत, अर्धमागधी, पालि, प्राकृत, अपभ्रंश ए बधां ज तेमनां कार्यक्षेत्र हतां, अने केटलाकमां तो तेमणे करेलुं संशोधनकार्य पायानुं हतुं..

प्रस्तुत स्मरणांजलि रूप पुस्तकमां तेमने लगती अवसानप्रशस्ति, तेमनां स्वकीय लखाणोनी संदर्भसूचि अने सालवारी, तेमणे करेलां अवलोकनोनी संदर्भसूचि, तेमनां महत्त्वनां पुस्तकोनी विविध विद्वानोए पहेलां प्रकाशित करेली समीक्षाओनो संचय, तथा तेमनां वैदिक अध्ययनोनुं (पाउल थीमे), जैनविद्याने लगतां अध्ययनोनुं (ए. मेट्टे), अशोकलेखोने लगतां तथा पालि-अध्ययनोनुं (के. आर. नोर्मन मूल्यांकन-एटली सामग्री आपवां आवी छे. १९७४मां आल्स्डोर्फना ७०मा जन्मदिने तेमना विविध संशोधन सामयिकोमां प्रकाशित लेखोनो ७८४ पानांनो एक दळदार संग्रह (Ludwig Alsdorf's Kleine Schriften. Ed. A. Wezler.) प्रकाशित थयो हतो. तेमां 'उत्तराध्ययन'ने लगतां अध्ययनो, वैदिक आख्यान-सिद्धांतनी समीक्षा, 'वसुदेवहिंडी'नी परंपरा, भाषा अने वेढने लगतां संशोधनलेखो, जैन विश्ववर्णनने लगता लेखो अपभ्रंश संपादनोनी समीक्षाओ वगेरेनो समावेश थयेल छे (तेना मारा अवलोकन माटे जुओ 'संबोधि', ग्रंथ ९, पृ. ७५-७६). तेमना अवसान पछी १९८१मां एक स्मारक ग्रंथ पण प्रकाशित करवामां आव्यो (Studien Zum Jainismus und Buddhismus-Gedenschrift für Ludwig Alsdorf, Ed. K. Bruhn, A. Wezler). ए महापंडितना संशोधनकार्यना बधां पासांने लगतो एक सर्वसामान्य, व्यापक परिचय आपवानी नेमथी प्रस्तुत पुस्तक तैयार करायुं छे. संपादकोए तेमनी प्रस्तावनामां विगते आ हेतु समजाव्यो छे.

*

`Formes et usages de la concaténation en prakrit'. Nalini Balbir. Sauhṛdyamaṅgalam : Studies in Honour of Siegfried

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Lienhard on his 70th Birthday. Edited by M. Juntunen, W. L. Smith, C. Suneson. Stockholm, 1995, pp 5-26.

नलिनी बलबीरे आ लेखमां प्राकृत साहित्यमां थयेला, यमक नामा शब्दालंकारना एक प्रकार 'संदष्ट' के 'शृंखला' यमकना प्रयोगो विशे माहिती आपीने स्वरूप, भेदो, इतिहास वगेरे दृष्टिए चर्चा करी छे. मुख्यत्वे 'सूत्रकृतांग', 'सेतुबंध', विमलसूरिकृत 'पउमचरिय', 'कुवलयमाला', 'समराइच्चकहा', 'लीलावई कहा', 'चउपन्नमहापुरिसचरिय', 'पुहइचंदचरिय' वगेरेमां मळतां उदाहरणो तरफ ध्यान खेंच्युं छे. एक छेडे 'ऋग्वेद'मां (१०, ८४) तो बीजे छेडे आज पण प्रचलित अंतकडी के अंत्याक्षरीमां : ते 'प्रतिमाला' के 'भंडी' तरीके इसवी पहेलीथी वीशमी शताब्दी सुधी होवानुं पी. के. गोडेअे एक लेखमां बताव्युं छे) ए साहित्यिक रचनायुक्ति जाणीती होवानी पण नोंध लीधी छे. शृंखलायमकथी 'लाटानुप्रास' अलंकारनुं स्वरूप अने आस्वाद्यता जुदां होईने ते बंनेने एक खानामां नाखवानी लेखिकाए भूल करी छे. जूनी गुजरातीनां वसंतवर्णनना फागुप्रकारनां काव्योमां मध्ययमक (पूर्ववर्ती चरणना अंतने अने पछीना चरणना आदिने प्रत्येक पद्यार्धमां जोडतुं) लाक्षणिक छे – अने तेना अनुसरणमां रचायेल थोडाक संस्कृत फाग-काव्योमां पण तेनो प्रयोग थयो छे. कालिदासे पण 'रघुवंश'ना नवमा सर्गमां, आगळ जतां वसंतवर्णन कर्युं छे तेथी, १ थी ५४ पद्योमां चोथा चरणमां आरंभे यमकनो प्रयोग कर्यो छे.

*

## प्रकाशन-माहिती

### आचारांगसूत्र – प्र.श्रु., बालावबोध

**कर्ता** : श्री पार्श्वचंद्रसूरि. रचना : विक्रमनुं सोळमुं शतक. संपादक : श्री अमृत लालभाई भोजक, अमदावाद. प्रकाशक : श्री पार्श्वचंद्रसूरी साहित्य प्रकाशन समिति, मुंबई, ग्रंथमालाना संपादको : मुनिश्री भुवनचंद्रजी, डो. गुलाब देढिया, भरत सी. शाह.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अज्ञातकर्तृक अर्हत्प्रवचनसूत्र-सविवरण

सं.-पं. शीलचन्द्रविजयगणि

**'अर्हत्प्रवचन'** नामे नोंधायेली प्रस्तुत-मूलसूत्र तेमज तेनुं स्वोपज्ञ विवरण धरावती-कृतिनी एकमात्र प्रति, खंभातना श्री शान्तिनाथ प्राचीन ताडपत्रीय जैन भंडारमां सचवाई छे. मुनि पुण्यविजयजी-संपादित Catalogue of palmleaf Mss. in the Shantinatha Jain Bhandara, Cambay - part-1मां (Gos. Baroda, 1961) पृ. 174 पर क्र. 107 तरीके नोंधायेली, 139 पत्रोनी अने ११ विभिन्न कृतिओना संग्रहरूपे ताडपत्रीय हस्तप्रतिमां १०मी कृति तरीके आ 'अर्हत्प्रवचन-पंचाध्यायात्मक' नामनी कृति छे, जे १२२ थी १३८ एटले के कुल १६ पत्रोमां पथरायेली छे प्रति अधूरी - अपूर्ण होई लेखक तथा लेखन संवत आदिनुं वर्णन प्राप्त नथी, परंतु विक्रमना तेरमा शतकना पूर्वार्धमां ते लखाई होवानुं अटकळवामां आव्युं छे. कृतिना कर्तानो नामोल्लेख नथी, अने आ रचनानी प्रति अन्यत्र क्यांय-कोई भण्डारमां होवानुं अद्यावधि जाणवामां नथी आव्युं. परंतु कोई भण्डारमां कोईक आवी संग्रहात्मक पोथीमां आनी बीजी नकल मळी आवे ते अशक्य न गणाय.

'अर्हत्प्रवचन' ए तद्दन सरल छतां प्रगल्भ भाषामां थयेली मधुर लघु रचना छे. पांच मोटां सूत्रो छे, जेने अहीं 'अध्याय' तरीके वर्णवेल छे, अने ते सूत्रोमां दर्शावेला आंक मुजबना पदार्थोनुं स्वरूपवर्णन-मात्र करती विवृति पण आमां ज छे, जे संभवतः सूत्रकारे ज रचेल जणाय छे. वाक्यो टूंकां टूंकां छे, पद्धति सूत्रात्मक छे . थोडा अने ते पण सरल शब्दोमां जैनदर्शननी समजण आपवानो कर्तानो मजानो प्रयास छे, ए तो प्रथम दृष्टिए ज जणाई आवे.

पांच अध्यायो पैकी प्रथममां १०, द्वितीय अने तृतीयमां २०-२० , चतुर्थमां १३ तथा पंचम अध्यायमां १८ पदार्थोनुं प्रतिपादन थयुं छे. आ पदार्थोमां केटलीक बाबतो खास ध्यानार्ह छे, ते आ प्रमाणे :

१. पांच अणुव्रतो (१-३) नी साथे रात्रिभोजनत्यागने पण षष्ठ अणुव्रत गणाव्युं छे; प्रचलित परंपरामां तेनो समावेश सातमा व्रतमां थयो छे. २. सामान्य पद्धतिमां पहेलां समिति, पछी गुप्ति-एम क्रम छे, ज्यारे अहीं पहेलां गुप्ति, पछी समिति (१/६-७) वर्णवेल छे. ३ साधुना रजोहरण माटे **'पिच्छक'** शब्द अहीं प्रयोजेल छे (१/७) सामान्यतः आ शब्द दिगम्बर परंपरामां वपराता 'मोरपिच्छ' माटे प्रयोजाय छे. ४. दशविध 'यतिधर्म'ने माटे 'देश

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मानुभावनाः' एवो प्रयोग (१-८) थयो छे, तो 'रत्नप्रभा' आदी ७ नरक पृथ्वीओने **"धर्मभूमि"** तरीके (३-९) वर्णवी छे. ५. सिद्धान्तमां दशविध प्रायश्चित्त प्रसिद्ध छे, ज्यारे अहीं प्रायश्चित्त १२ प्रकारनां गणाव्यां छे, ते पण जुदी रीते, अने तेमां दशविध प्रायश्चित्तोनो पूर्णतः समावेश तो नथी ज थतो (२/१५) ६. नव तत्त्वनुं प्रतिपादन ७ तथा ९ एम बे भेदे परंपरामां मळे छे, अहीं तेने जुदां जुदां पाडीने जीवादि ९ पदार्थो (२/१)अने जीवादि ७ तत्त्वो (२/२) एम वर्णव्यां छे. ७. चार प्रकारनां ध्याननी व्याख्याओ परंपरा करतां जुदी पडे छे. तेने वर्णवतां पद्यो पण ध्यानपात्र छे (२/१९) ७. कल्पस्थितिक-वैमानिक प्रकारो माटेनी मान्य संख्याथी जुदा पडीने तेना १६ प्रकारो/नामो अहीं वर्णव्यां छे; (४/५) तो नव ग्रैवेयको तथा अनुत्तर-एम मळीने कल्पातीत देवो (अहमिन्द्रो)ना १० भेद बताव्या छे; पाछा पांच अनुत्तरो जुदां तो खरां ज ( ४/६) ८. नव 'अनुदिश' प्रकारना देवो पण जणाव्या छे (४/५) जेने माटे तत्त्वार्थसूत्रमां कोई निर्देश जणातो नथी; नव लोकन्तिको ते आ होई शके? ९. द्विविध शील (४/१४), बे भेदनी निर्जरा (५/६) द्विविध संयम (१/८), देश अने सर्व-बे जातनो मोक्ष (५/११) त्रण प्रकारे सिद्ध (५/१५) बार सिद्धानुयोगद्वारो (५/१६) - आ बधां अपूर्व वर्गीकरणो छे. १०. पुलाकादि पांच भेदे निर्ग्रन्थोनुं स्वरूप मान्य सैद्धान्तिक परंपराने तद्दन चातरनारुं अपूर्व जणाय छे (५/१४). आ पांच निर्ग्रन्थ-स्वरूप-वर्णनमां ज 'प्रथमानुयोग' नो उल्लेख पण छे, जे नोंधपात्र छे. ११. त्रण अज्ञानोमां त्रीजुं. 'विभंगज्ञान' तरीके ज परंपरामां प्रसिद्ध छे, अहीं (२/१०) तेने **विभङ्गाज्ञान**-नामे वर्णव्युं छे. ए ज रीते, १४ पूर्वमां अग्यारमुं पूर्व नन्दिसूत्रादिमां 'अवन्ध्य' पूर्व तरीके गणाव्युं छे, ज्यारे अहीं (२/१३) तेने 'कल्याण' एवा नामे ओळखायेल छे. १२. केटलांक नामो पण ध्यान देवा जोग छे. त्रिपिष्ठ (त्रिपृष्ठ), द्विपिष्ठ (द्विपृष्ठ), अरु(अर; तीर्थंकर), रामण (रावण), प्रढाल (पेढाल), जरासिन्धु (जरासन्ध), प्रागम्य (प्राकाम्य) इत्यादि.

एकंदरे कृतिने तपासतां कहेवुं जोईए के परंपराथी न्यारुं आमां घणुं छे. कदाच तेथी ज तेनो झाझो प्रचार न थयो होय तो ते बनवाजोग छे. आ रचना जो दिगम्बर परंपरा-नी होय तो ते माटे ते परंपराना ग्रन्थो तथा प्रतिपादनो तपासवानां रहे. परंतु तत्त्वार्थसूत्र तो दिगम्बरपरंपरामान्य पण छे, अने आमां तेनाथी पण केटलीक बाबतो जुदी पडे छे.

जे होय ते, पण आ रचना अपूर्व छे, तेनुं भाषा सौष्ठव तेमज प्ररूपण विलक्षण छे, तेमां शंका नथी. क्षणार्ध माटे एवो पण विचार झबकी जाय के हेमाचार्यना शिष्य आ. रामचन्द्रनी तो आ रचना नहि होय ? भाषा, विचारो अने प्रतिपादनोनी मौलिकता जोतां आवो प्रश्न सहज जागे, तो पण ते अनुत्तर ज रहे छे.

आ रचना विशे कोइ जाणकार वधु प्रकाश पाडे तो ते आवकारदायक हशे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अज्ञातकर्तृकं

# श्री अर्हत्प्रवचनसूत्रम् ॥

अथातो अर्हत्प्रवचनं व्याख्यास्यामः । तद् यथा ॥ तत्रेमे षड् जीवनिकायाः । पञ्च महाव्रतानि । पञ्चाणुव्रतानि । त्रीणि गुणव्रतानि । चत्वारि शिक्षाव्रतानि । तिश्रो गुप्तयः पञ्च समितयः । दश धर्म्मानुभावनाः । द्वादशानुप्रेक्षाः । द्वाविंशति परीषहाः ॥ इत्यर्हत्प्रवचने **प्रथमोऽध्यायः** समाप्तः ॥

अथातोऽर्हत्प्रवचनसङ्ग्रहं व्याख्यास्यामः । तद्यथा- अथेत्ययं निपातः पूर्व्वप्रकृत्यपेक्षः । अथ (त) इति पञ्चमीनिर्देशः ।

अर्हन्तो नाम भगवन्तो लोकोत्तमाः सर्व्वज्ञाः सर्व्वलोकदर्शिनः । तैरुपदिष्टं प्रवचनं गणधरदेवै रचितम् । तद् व्याख्यास्यामः कथयिष्यामः प्रकाशयिष्यामः इत्यर्थः (१) तथैव षट्(ड्) **जीवनिकायाः** । कतमाः ? । पृथ्वीकायिकाः। आपःकायिकाः । तेजः-कायिकाः । वायुकायिकाः । वनस्पतिकायिकाः । त्रसकायिकाश्चेति । एते षट्(ड्)-जीवनिकाया न हिंस(सि)तव्या व्रतपरिरक्षणार्थम् ।

(२) **पञ्च महाव्रतानि** । कतमानि ? । यावज्जीवं प्राणातिपाताद्विरतिः । यावज्जीवं मृषावादाद्विरतिः । यावज्जीवं अदत्तादानाद्विरति : । यावज्जीवं मैथुनाद्विरतिः । यावज्जीवं परिग्रहाद्विरतिः । इत्येतानि रात्रि भोजनाद्विरतिः षष्ठानि भवन्ति ।

(३) **पञ्चाऽणुव्रतानि** । कतमानि ? । यावज्जीवं स्थूलकृतप्राणातिपाताद्विरतिः । यावज्जीवं स्थूलकृतमृषावादाद्विरतिः । यावज्जीवं स्थूलकृतअदत्तादानाद्विरतिः । यावज्जीवं स्वदारसन्तोषः परदाराद्विरतिः । यावज्जीवं इच्छाकृतपरिग्रहपरिमाण(णं) । षष्ठं अणुव्रतं रात्रिभोजनं(न) वर्ज्जनिमिति । एतानि पञ्चाणुव्रतानि ।

(४) तत्र **त्रीणि गुणव्रतानि** । [कतमानि ?] । दिसि(शा)विदिसि(शा)-प्रत्याख्यानं द्विविधम(न)र्थदण्डाद्विरति :। कतमाः (माः) ? ।

दण्ड-पास(श)विरालश्च विष-स(श)स्त्राग्नि-रज्जवः।
परेभ्यो नैव देयास्ते स्वपरघातहेतवः ॥
छेदं भेदं वध(धं) बन्धं गुरुभारातिरोपणम् ॥
न कायन्ति स्वयमन्येषु (मन्यैः) ।
तृतीयं गुणव्रतं भोगोपभोगकृतपरिमाणं चेति ॥ एतानि त्रीणि गुणव्रतानि ॥

(५) **चत्वारि शिक्षाव्रतानि** । कतमानि ? । सामायिकम् । दिवसावशेषिकम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्व्वे(र्वणि) पौषधोपवासिकम् । अतिथिसंविभागिकम् । पश्चिमसंल्लेखनामरणान्तिकम् । एतानि चत्वारि शिक्षाव्रतानि । तत्र शीलव्रतानि कथितानि श्रावकधर्म्मश्चेति ।

(६) **तिश्रो गुप्तयः । कतमा : ?** । कायगुप्ति । वचोगुप्ति । मनोगुप्तिरिति । तत्र कायगुप्तिर्नाम स(श)यनासनादाननिक्षेपणस्थानचंक्रमणाकुञ्चनप्रसारणादीनां कायचेष्टानियमः। स एषा कायगुप्तिर्नाम । वाचनप्रच्छनप्रश्नव्याकरणादिषु वाग्गुप्तिर्नाम । मनोगुप्तिर्नाम सर्व्वसावद्यसङ्कल्पनिरोधः, तथा अकार्यका(क)रणचिन्तनीयस्य निरोधः । स मनोगुप्तिः । एताः तिश्रो गुप्तयः ।

(७) **पञ्च समितयः** ।कतमाः ?।ईर्या-भाषा-एषणा-आदान निक्षेपणोत्सर्गाश्चेति। तत्र ईर्यासिमितिर्नाम 'इ(ई)रगतै' धात्वर्थे । ईर्या नाम रथस(श)कटयानवाहनाक्रान्तेषु मार्ग्गेषु प्राशुकविविक्तेषु सूर्यरश्मिप्रकाशितेषु युगम(युग) मात्रदृष्टिना भूत्वा गमनागमनं कर्तव्यमिति । एषा ईर्यासमितिः ।। भाषासमितिर्नाम हितमितअसन्दिग्धनिरवद्यार्थ-नियमभाषिणी वाणी भाषितव्या । एषा भाषासमितिर्नाम ।। पाणिपात्रे भिक्षागोचरगतेन अननुमताऽकृतअकारितअसङ्कल्पितनवकोरिपरिशुद्धं दशदोषविवर्ज्जितं चतुर्दशमलवि-शुद्धं निर्द्धूमं भोक्तव्यमिति सा एषणासमितिर्नाम । आदाननिक्षेपणा समितिर्नाम अङ्गोपाङ्ग-प्रत्यङ्गाकुञ्चनप्रशा(सा)रणादीनां निषद्यास(श)य्यासनादीनां अवस्यं(श्यं) निरीक्ष(क्ष्य) **पिच्छकेन** प्रमार्य(र्ज)नादाननिक्षेपः(पादि ?) कर्तव्यमिति । सा एषणा(एषा)-ऽऽदाननिक्षेपणासमितिः । उत्सर्गसमितिर्नाम स्थाण्डिल्ये स्थावरजङ्गमजन्तुविवर्ज्जिते निरीक्ष(क्ष्य) प्रमृज्य वातमूत्रपुरीषोत्सर्गश्लेष्मादीनां (वातमूत्रपुरीषश्लेष्मादीनां उत्सर्गः) कर्तव्यः । सा उत्सर्गसमितिनार्म । एता(:)पञ्च समितयः

८. **दश धर्म्मानुभावना :** । कतमा : ? । उत्तमक्षमामार्द्दवार्ज्जवसत्यसौ(शौ)च-संज(य)मस्त(त)पस्त्यागाकिञ्चि(ञ्च)न्यब्रह्मचर्यमिति । उत्तमक्षमा नाम सर्व्वसत्त्व-सहिष्णुत्वम्। मार्दवं नाम मृदुत्वम् । आर्जवं नाम ऋजुत्वम् । सत्यं नाम अवञ्चकत्वम् सौ-(शौ) चं नाम निर्लोभत्वम् । सं(य)मो नाम द्विविध :- इन्द्रियसंज(य) मः । प्राणसंज-(य)मश्चेति । तपो नाम इच्छानिरोधः । त्यागो नाम निर्ममत्वम् । आकिञ्चन्यं नाम अपरिग्रहत्वम्। ब्रह्मचर्यं नाम अमैथुनत्वम् । एता दश धर्म्मानुभावना (:) ।

(९) **द्वादशानुप्रेक्षा(:)**।कतमाः ?। अध्रुव(:)।अस(श)रण(:)।अनित्यः। संसार :। एषः (एकः) । अन्यः । अशुचि (:) । आश्रवः । संवरः । निर्ज्जराः (रा) । लोकः। बौधिः(धेः) दुर्ल्लभत्वम् । धर्म्मस्वाख्यात(:) । एत(ता) द्वादशानुप्रेक्षा भवन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१०) **बावीस( द्वाविंशति )परीस( ष )हा:** । कतमा : ? । क्षुत्परीषह: । पिपासा परीस(ष)ह: । सी(शी)तपरीषह: । उष्णपरीषह: । मस(श)कपरीषह: । नग्नपरीषह: । रतिअरतिपरीषह: । स्त्रीपरीषह: । चर्यापरीषह: । निद्रा( निषद्या ?) परीषह: । सज्या(शय्या)-परीषह: । आक्रोशपरीषह: । वधबन्धपरीषह: । अयाचनापरीषह: । अलाभपरीषह: । रोगपरीषह: । तृणस्पर्श [परीषह:] । मलपरीषह: । अस्नानपरीषह:(?) । सत्कारपरीषह: । पुरस्कार-परीषह: । (सत्कारपुरस्कार परीषह: ?) प्रज्ञा[परीषह:] । अज्ञानपरीषह: । सम्यक्त्वपरीषह श्चेति । एते द्वाविंशतिपरीषहा: ॥

इत्यर्हत्प्रवचने प्रथमोऽध्याय: समाप्त: ॥ ॥

## द्वितीयोऽध्याय:

नव पदार्था: । [सप्त तत्त्वानि] । चतुर्विधो न्यास: । सप्त नया: । चत्वारि प्रमाणानि । षट्(ड्) द्रव्याणि । पञ्चास्तिकाया: । द्विविधो गुण: । पञ्चज्ञानानि । त्रीणि अज्ञानानि । चत्वारि दर्शनानि । द्वादशाऽङ्गानि । चतुर्दश पूर्व्वाणि । द्विविधं तप: । द्वादश प्रायश्चितानि । चतुर्विधो विनय: । दश वैयावृत्ता(त्त्या)नि । पञ्चविधो( ध:) स्वाध्याय: । चत्वारि ध्यानानि । द्विविधो व्युत्सर्ग: ॥ इति अर्हत्प्रवचने द्वितीयं सूत्रम् ॥

अतो विवर: । (१) **नव पदार्था (:)** । कतमा: ?। जीवाजीवपुण्यपापा-श्रवसंवरनिर्ज्जराबन्धमोक्षाश्चेति । एते नव पदार्था : ॥

(२) **सप्त तत्त्वानि** । कतमानि ? । जीवाजीवाश्रवसंवर निर्ज्जराबन्धमोक्ष(क्षा)-श्चेति । एतानि सप्त तत्वानि ॥

(३) **चतुर्विधो न्यास:** । [कतम: ? ।] नामस्थापनाद्रव्यभावतश्चेति । स एष चतुर्विधो न्यास: ॥

(४) **सप्त नया:** । कतमा: ? । नैगमसङ्ग्रहव्यवहार ऋजुसूत्रशब्दसमभिरूढैवम्भूता नया: । नैगमो द्विभेद: देशग्राही । सकलग्राही । शब्दस्तु द्विभेद: । समभिरूढ: । समभिरूढ: । एवंभूत: । इत्येष सप्तनया(य)भेद: ॥ (?)

(५) **चत्वारि प्रा( प्र )माणानि** । कतमानि ? । प्रत्यक्षम् । अनुमानम् । उपमानम् । आप्तवचनम् । एतानि चत्वारि प्रमाणानि । प्राधान्येन द्वे एव प्रमाणे । प्रत्यक्षं परोक्षं चेति॥

(६) **षट्( ड् )द्रव्याणि** । कतमानि ? । जीव: । पुद्गल: । धर्म्म: । अधर्म्म: । आकास(श:)काल(:) । इति षट्(ड्) द्रव्याणि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७) **पञ्चाऽस्तिकाया:** । कतमा: ? । जीवकाय (जीवास्तिकाय:) । पुद्गल-(लास्ति)काय(:) । धर्म्माधर्म्मकाय (धर्मास्तिकाय: । अधर्मास्तिकाय:) । आकाश-(शास्ति)कायमि(य इ)ति ॥

चतुर्भि: प्रमाणै: जीवति जीविष्यति जीवितपूर्वो वा जीव: । पूरणात् पुद्गल: । पूरयति गालयतीति वा पुद्गल: । धर्मास्तिकायो गतिलक्षण: । अधर्म्मास्तिकाय: स्थितिलक्षण: । आकाशास्तिकायश्चावगाहनालक्षण: । एते पञ्चाऽस्तिकाया: ॥

(८) **द्विविधो गुण:** । कतम: ? । जीवगुण: अजीवगुणश्चेति । एवं द्विविधो गुण: ॥

(९) **पञ्च ज्ञानानि** । कतमानि ? । मतिज्ञानम् । श्रुतिज्ञानम् । अवधिज्ञानम् । मन:पर्यवज्ञानम् । केवलज्ञानं चेति । एतानि पञ्च ज्ञानानि भवन्ति ॥

(१०) **त्रीणि अज्ञानानि** । [कतमानि ? ।] मत्यज्ञानम् । श्रुताज्ञानम् । विभङ्गाज्ञानं चेति । एतानि त्रीणि अज्ञानानि ।

(११) **चत्वारि दर्शनानि** । कतमानि ? । चक्षुद (र्द) र्शनम् । अचक्षुद (र्द) र्शनम् । अवधिदर्शनम् । केवलदर्शनमिति । एतानि चत्वारि दर्शनानि ॥

(१२) **द्वादशऽङ्गानि** । कतमानि ? आचार: । सूत्रकु(कृ)त: । स्थानम् । समवाय: । व्याख्याप्रज्ञप्ति: । ज्ञातृकथा । उपासकाध्ययनम् । अन्तकु(कृ) द्दशा । अनुत्तरो(रौ)पया(पा)-दिकंदसं(कदशा:) । प्रश्नव्याकरणम् । विपाकसूत्रम् । दृष्टिवादं च । एतानि द्वादशाऽङ्गानि ॥

(१३) **चतुर्दश पूर्व्वाणि** । कतमानि ? । उत्पादपूर्व्वम् । अग्रायणीयम् । वीया-(र्या)नुप्रवादम् । नास्तिप्रवादम् । ज्ञानप्रवादम् । सत्यप्रवादम् । आत्माप्रवादम् । कर्म्मप्रवादम् । प्रत्याख्याननामधेयम् । विद्यानुप्रवादम् । कल्याणनामधेयम् । प्र(प्रा)णावायम् । क्रियाविसा(शा)लम् । लोकबिन्दुसारं चेति । एतानि चतुर्दश पूर्व्वाणि ॥

(१४) **द्विविधं तप:** । कतमा : (मम्) ? । बाह्या(ह्यम)भ्यन्तरं चेति । बाह्यं तप: षड्विधम् । अनस(श)नम् । अवमौदर्यम् । वृत्तिपरिसंख्यानम् । रसपरित्याग: । कायक्लिेस-(क्लेश:) । विविक्तस(श)य्यासनमिति ॥ अभ्यन्तरं षट्(ड्)विधम् । प्रायश्चित्तम् । विनयो (य:) । वैयावृत्तम् । स्वाध्यायो (य:) । ध्यानम् । व्युत्सर्गश्चेति । एतद् द्विविधं तप: ॥

(१५) **द्वादश प्रायश्चित्तानि** । कतमानि ? । अर्द्धमासिकसमुद्घातम् । मासिकसमुद्घातम् । द्विमासिकसमुद्घातम् । त्रमासिकसमुद्घातम् । चतुर्मासिक-समुद्घातम् । पञ्चमासिकसमुद्घातम् । षण्मासिकसमुद्घातम् । एक आलोचनार्ह: । एक उपस्थापनार्ह: । एक: प्रतिक्रमणार्ह: । एक: कृपायोग्यार्ह: । एक: कायोत्सर्गार्ह: । एतानि द्वादश प्रायश्चित्तानि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१६) **चतुर्विधो विनयः** । कतमः ? । दर्शनविनयः । ज्ञानविनयः । चारित्रविनयः। औपचारिकविनयश्चेति चतुर्विधो विनयः ॥

(१७) **दश वैयावृत्ता( त्त्या )नि** । कतमानि ? । आचार्यवैयावृत्त्यम् । उपाध्यायवैयावृत्त्यम् । तपस्विवैयावृत्त्यम् । सिष्य( शैक्ष )वैयावृत्त्यम् । गणवैयावृत्त्यम् । कुलवैयावृत्त्यम् । [ सङ्घवैयावृत्त्यम् ।] सा( शा )स्त्र( साधु ? )वैयावृत्त्यम् । ग्लानवैयावृत्त्यम् । मनोज्ञवैयावृत्त्यम् । एतानि दस( श )वैयावृत्ता( त्त्या )नि ॥

(१८) **पञ्चविधः स्वाध्यायः** । कतमानि ( कतमः ) ? । वाचन( ना ) । प्रच्छन( ना ) । अनुप्रेक्षा । आम्नायः । धर्मोपदेशश्चेति । एषः( ष ) पञ्चविधः स्वाध्यायः ॥

(१९) **चत्वारि ध्यानानि** । कतमानि ? । आर्त्तरौद्रध्यान( धर्म्म )शुक्लानि । आर्त्त( र्त्तं ) नाम राज्योपभोगसं ( ? ) शयनवाहन वस्त्राभरणेषुइच्छा भिलाषमतिपूर्व्वकम् । तदार्त्तं नाम । रौद्रं नाम छेदनदहनताडनबन्धनमरणानुकम्पारहितरागकरणं तत् रौद्रं ध्यानं नाम । सूत्रार्थमार्गणमहाव्रतभावनाप ञ्चेन्द्रियोपशमनबन्धमोक्षगमनहेतुचिन्तापूर्वकं धर्म्मध्यानं नाम । शुक्लध्यानं नाम इन्द्रियविषयप्रवृतमनोवाका( क्का )य सङ्कल्पनिकृ( वृ )ता( त्त्या )-त्मकं मोक्षकारणं शुक्लध्यानमिति । एतदेवाह–

राज्योपभोगशयनासनवाहनेषु
स्त्रीगन्धमाल्यमणिरत्नविभूषणेषु ।
इच्छाभिलाषमतिमात्रमुपैति मोहात्
ध्यानं तदार्त्तमिति तत्प्रवदन्ति सन्तः ॥
संछेदनैर्दहनताडनमारणैश्च
बन्धप्रहारदर्शनैश्च विकर्तनैश्च ।
यस्येह रागमुपजा( या )ति न चानुकम्पा
ध्यानं [ च ] रौद्रमिति तत्प्रवदन्ति तज्ज्ञाः ॥
सूत्रार्थमार्ग्गणमहाव्रतभावनानि
पञ्चेन्द्रियोपशमनानि दया च भूते ।
बन्धप्रमोक्षगमना गतिहेतुचिन्ता
ध्यानं सुधर्म्ममिति तत्प्रवदन्ति तज्ज्ञा : ॥
यस्येन्द्रियाणि विषयेषु निवर्त्तितानि
सङ्कल्पकल्पमविकल्पविकारदोषैः ।
योगैस्त्रिभिस्त्वहरहर्निभृतान्तरात्मा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्यानं तु शुक्लमिति तत्प्रवदन्ति तज्ज्ञा :॥
आर्ते तिर्यग्गतिस्तथा (?) गतिरधो ध्याने तु रौद्रे सदा
धर्मे देवगति: शुभं च हि फलं शुक्ले च जन्मक्षयं(य:) ।
तस्माद् व्याधिरुजान्तके हितकरे संसार निस्तारके
शुक्लध्यानवरे रज:प्रशमने कुर्व्वन्तु यत्नं बुधा: !॥
एतानि चत्वारि ध्यानानि ॥

(२०) **द्विविधो व्युत्सर्ग्गः** । कतमः ?। बाह्योऽन्तरश्चेति । बाह्यो नाम सर्व्वारम्भपरित्यागः । अभ्यन्तरो रागद्वेषमोहादीनां परित्यागः । इत्येवं द्विविधो व्युत्सर्ग्गः। इत्यर्हत्प्रवचने द्वितीयोऽध्यायः समाप्तः ॥

## तृतीयोऽध्यायः

त्रिविधः कालः । षट्(ड्)विधः कालसमयः । त्रिविधोलोकः ।अर्द्धतृतीयद्वीपसमुद्राः। पञ्चदेश क्षेत्राणि । चतुस्त्रिंशद्वर्षधरपर्वताः । पञ्चदश कर्म्मभूमयः । त्रिंशद् भोगभूमयः । सप्त धर्म्मभूमयः । सप्तैव च महानरकाः । चतुर्द्दश कुलकराः । चतुर्विंशतितीर्थकराः । नव बलदेवाः । नव वासुदेवाः । नव प्रतिवासुदेवाः । एकादश रुद्राः । द्वादश चक्रवर्त्तिनः। नव निधयः । चतुर्दश रत्नानि । द्विविध(:) पुद्गलः ॥

इति अर्हत्प्रवचने तृतीयं सूत्रम् ॥

(१) **त्रिविधः काल** : । कतमः ?। अतीतोऽनागतः वर्तमानश्चेति त्रिविधो(धः) कालः ॥

(२) **षट्(ड्)विधः कालसमयः** । कातमः ?।सुषमसुषमः।सुषमः। सुषमदुःखमा(मः) ।दुःखमः(म)सुखमः।अतिदुःखमः।इत्येष षड्विधः कालसमयः॥

(३) **त्रिविधो लोकः** । कातमः ? उद्धर्वलोकः । अधोलोकः । तिर्यग्लोक : । इत्येष त्रिविधो लोकः ॥

(४) **अर्द्धतृतीया द्वीपसमुद्राः** । कतमाः ? । जम्बूदीपः लवणसमुद्रः । धातु(त)कीखण्डः । कालोदधिसमुद्रः । पुष्करार्द्धं चेत्येते अर्द्धतृतीया द्वीपसमुद्राः॥

(५) **पञ्चदश क्षेत्राणि** । कतमानि ? । पञ्च भरतानि । पञ्च विदेहानि । पञ्च ऐरावतानि । एतानि पञ्चदश क्षेत्राणि ॥

(६) **विंशति(:) वर्षाः**। कतमाः ? । पञ्च हैमवताः । पञ्च हरिवंसाः (वर्षाः) । पञ्च रम्यकाः । पञ्च हैरण्यवताः । इत्येते विंशतिवर्षाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७) **चतुस्त्रिंशद्वर्षधरपर्वताः** । कतमा :। ? पञ्च हिमवन्तः । पञ्च महाहिमवन्तः। पञ्च निषध(धा): । पञ्च नीला(:) । पञ्च रुक्मिणः । पञ्च शिखरिणः । चत्वार इषुकारपर्व्वताः॥

(८) **पञ्चदश कर्म्मभूमयः** । कतमा : ?। पञ्च भारतिकाः । पञ्चे ऐरावतिकाः । पञ्च महावैदि(देहि)काः । पञ्चोत्तरकौरविकाः । पञ्च देवकौरविकाः ।

[अत्रैवं पाठः सम्भाव्यते- '' पञ्चदश कर्मभूमयः । कतमाः ? । पञ्च भारतिकाः। पञ्च ऐरावतिकाः । पञ्च महावैदेहिका : । एताः पञ्चदश कर्मभूमयः ॥

त्रिंशद् भोगभूमयः । कतमाः ? पञ्च हैमवताः । पञ्च हारिवर्षाः । पञ्च राम्यकाः। पञ्च हैरण्यवताः । पञ्च देवकौरविकाः । पञ्चोत्तरकौरविकाः ।] एतास्तृंस(स्त्रिंश)द् भोगभूमयः ॥

(९) **सप्त धर्म्मभूमयः** । कतमाः ? । रत्नप्रभा । स(श)र्क्कराप्रभा । वालुकप्रभा। पङ्कप्रभा । धूमप्रभा । तमप्रभा । महातमप्रभा । एता(:) सप्त धर्म्मभूमयः ॥

(१०) **सप्त महानरकाः** । कतमाः ? । कालः । महाकालः । रौरवः । महारौरवः। असिपत्रवनम् । कूटशाल्मलिः । कुम्भीपाकश्चेति । एते सप्त महानरकाः ॥

(११) **चतुर्दश कुलकराः** । कतमाः ? सनुमतिः(?) प्रश्रुतिः । क्षेमंकरः। क्षेमन्धरः। सीमङ्करः । सीमन्धरः । विमलवाहनः । चक्षुष्मान् । यशस्वी । अभिचन्द्रः । चन्द्राभः । प्रसेनजित् । मरुदेवः । नाभिश्चेति । एते चतुर्दश कुलकराः ॥

(१२) **चतुर्विंशति तीर्थकराः** । कतमाः ? । ऋषभः । अजितः । सम्भवः । अभिनन्दः । सुमतिः । पद्मप्रभः । सुपार्श्वः । चन्द्रप्रभः । पुष्पदन्तः । शीतलः । श्रेयांसः । वासुपूज्यः । विमलः । अनन्तः। धर्म्मः । शान्तिः । कुन्थुः । अरुः । मल्लिः । मुनिसुव्रतः। नमिः । अरिष्टनेमिः । पार्श्वः । वर्धमानश्चेति । एते चतुर्विंशतितीर्थकराः ॥

(१३) **नव बलदेवाः** । कतमाः ? । विजयः । अचलः । सुधर्म्मः । सुदर्शनः । नन्दकः । नन्दिमित्रः । रामः । पद्मश्चेति । एते नव बलदेवाः ॥

(१४) **नव वासुदेवाः** । कतमाः ? । त्रिपिष्ठः । द्विपिष्ठः । स्वयम्भूः । पुरुषोत्तमः। पुरुषसिंहः । पुरुषपुण्डरीकः । दत्तः । नारायणः । विष्णुश्चेति । एते नव वासुदेवाः ॥

(१५) **नव प्रतिवासुदेवाः** । कतमाः ? । अश्वग्रीवः । तारकः । मेरुकः । निसु(शु)म्भः । बलिः । प्रह्लादः । मधुकीटकः । रामणः । जरासिन्धुश्चेति । एते नव प्रतिवासुदेवाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१६) **एकादश रुद्राः** । कतमाः ? । भीमावलिः । जितशत्रुः । रुद्रः । विश्वानलः । सुप्रतिष्ठः । अचलः । पुण्डरीकः । अजितधरः । अजितनाभिः । प्रढालः । सातकिसुतश्चेति । एते एकादस(श) रुद्राः ॥

(१७) **द्वादश चक्रवर्तिनः** । कतमाः ? भरतः । सगरः । मघवा । सनंतकुमारः । शान्तिः । कुन्थुः । अरुः । सुभूमः । पद्मः । हरिषेणविजयः । ब्रह्मदत्तश्चेति । एते द्वादशः । चक्रवर्तिनः ॥

(१८) **नव निधय( : )** । कतमाः ? । नैसर्पः । माणवकः । पिङ्गलः । पाण्डुकः । कालः । महाकालः । पद्मः । शङ्खः । सर्वरत्नश्चेति । एते नव निधयः ।

(१९) **चतुर्दश रत्नानि** । कतमानि ? चक्रं । छत्रं । चर्म्म । मणिः । काकणिः । खड्ग । दण्डः । हयः । गजः । सेनापतिः । उपरोहितः(पुरोहितः) । ग्र(गृ)हपतिः । स्थपतिः । कन्याश्चे(चे)ति । एवं चतुर्दश रत्नानि ॥

(२०) **द्विविधः पुद्गलः** । स्कन्धः । परिमाण(परमाणु) श्चेत्येष द्विविध(:) पुद्गलः॥

**इत्यर्हत्प्रवचने तृतीयोऽध्यायः समाप्तः ॥**

## चतुर्थोऽध्यायः ॥

देवाश्चतुर्णिकायाः । भवनवासिनो दशविधाः । व्यन्तरा (अ)ष्टविधाः । ज्योतिष्काः पञ्चविधाः । वैमानिका द्विविधाः । कल्पस्थितिका अहमिन्द्राश्चेतिः । [पञ्चानुत्तराः ।] पञ्च जीवगतयः । षट् पुद्गलगतयः । अष्टविधश्चात्मसद्भावः । पञ्चविधं शरीरम् । अष्टगुणा रिद्धिः पञ्चेन्द्रियाणि । षट् लेस्याः(श्याः) । द्विविधं शीलम् ।

**इत्यर्हत्प्रवचने चतुर्थं सूत्रं समाप्तम् ॥ ॥**

(१) **देवाश्चतुर्निकायाः** । कतमाः ? । भवनवासिनो(नः) । व्यन्तराः । ज्योतिष्काः । वैमानिकाः । एते चतुर्निकायाः ॥

(२) **भवनवासिनो दशविधाः** । कतमाः ? असुरकुमाराः । नागकुमाराः । सुवर्णकुमाराः । अग्निकुमाराः । वायुकुमाराः । स्तनितकुमाराः । विद्युत्कुमाराः । उदधिकुमाराः । द्वीपकुमाराः । दिक्षु(क्) कुमाराः । एते भवनवासिनो दशविधाः ॥

(३) **व्यन्तरा [अ]ष्टविधाः** । कतमाः ? । किन्नरः । किम्पुरुषः । महोरगः । गन्धर्व्वः । यक्षः । राक्षसः । भूतः । पिसा(शा)चाश्चेति । एते व्यन्तरा (अ)ष्टविधा :॥

(४) **ज्योतिष्काः पञ्चविधाः** । कतमाः ? सूर्य(ा)चन्द्रमसौ ग्रहनक्षत्र प्रकीर्णकताराकाश्चेति । एते ज्योतिष्काः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(५) **वैमानिका द्विविधाः** । कल्पस्थितिका अहि(ह)मिन्द्राश्चेति । कल्पस्थति (काः) षोडस(श)विधा । कापिष्ठः । सु(शु)क्रः । महासु(शु)क्रः स(श)तारः । सहस्त्रारः। आणतः । प्राणतः । आरणः । अच्युतक श्चेति । एते कल्पस्थितिकाः ॥ अहमिन्द्रा नव (?दश)विधा । कतमाः ? प्रथमा(म)प्रथमग्रैवेयकविमानवासिनः । प्रथममध्यमग्रैवेयकविमान वासिनः । प्रथमउपरिमग्रैवेयकविमानवासिनः । मध्यमप्रथमग्रैवेयकविमानवासिनः। मध्यममध्यमग्रैवेयकविमानवासिनः । मध्यमउपरिमग्रैवेयकविमानवासिनः । उपरिम प्रथमग्रैवेयकविमानवासिनः । उपरिममध्यमग्रैवेयकविमानवासिनः । उपरिमउपरिमग्रैवेयकविमानवासिनः । अनुत्तरविमानवासिनश्चेति । एते अहमिन्द्रा । नव (दश ?) विधाः ॥

नवानुदिसगाच्चय(?) कथ्यते ।–

"लच्छी अलच्छी मालिनी वैरे वैरोचने च बोधव्वा ।
सोमो य सोमरूए अंके फलिहे य आइच्चो ॥"

एते नवानुदिशा : ॥ (?)

(६) **पञ्चाऽनुत्तराः** । कतमाः ? । विजयः । वे(वै)जयन्तः । जयन्तः । अपराजितः। सर्वार्थसिद्धश्चेति । एते पञ्चानुत्तराः ॥

(७) **पञ्च जीवगतयः** । कतमाः ? । नरकगतिः । तिर्य(ग्)गतिः । मनुष्यगतिः। देवगतिः श्चेति । चतु(त) । मोक्षगति गतयः संसारभ्रमणहेतुभूताः । पञ्चमी गति(:) कर्म्मक्षयजनिता अष्टगुणप्राप्तिहेतुः । एताः पञ्च गतयः ॥

(८) **षट्पुद्गलगतयः** । कतमाः ? । पूर्वदक्षिणपश्चिमउत्तर ऊर्ध्वअधस्तिर्य(ग्)-गतिः । एता(:) पुद्गलगतयः ॥

(९) **अष्टविध आत्मसद्भावः** । अस्त्यात्मा नित्यः । अनित्य : । अमूर्तः । सरीरः (शरीरी ?) अरूपः । अकर्ता । गुणवान् । स(श)रीरगतः । संहरण विसथण(विस्तरण) धर्म्म(:) प्रदीपवत् । अनादिबन्धान् बद्धः । तद्विप्रयोगो मोक्षः । इत्येवं अष्टविधो(धः) आत्मसद्भावः॥

(१०) पञ्चविधं स(श)रीरम् । कतमाः (मं) ? । औदारिकं । वैक्रियं । आहारकं। तैजसं । कार्मणं चेत्येवं पञ्चविधं स(श)रीरम् ॥

(११) **अष्टगुणा रिद्धिः** । कतमाः (मा) ? । अणिमा । महिमा । लघिमा । प्राप्ति। प्रागम्यः (प्राकाम्यं) । इसि(ईशि)त्वं । वसि(शि)त्वं ? कामरूपित्वं । सर्व्ववसि(शि) त्वमिति । एषा अष्टगुणा रिद्धिः ॥

(१२) **पञ्चेन्द्रियाणि** । कतमानि ? । चक्षुरिन्द्रियं । श्रोत्रेन्द्रियं । घ्राणेन्द्रियं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रसनेन्द्रियं । स्पर्शनेन्द्रियं चेति । एतानि पञ्चेन्द्रियाणि भवन्ति ॥

(१३) **षट् लेश्याः** । कतमाः? कृष्णलेश्या । नीललेश्या । क(का) पोतलेश्या। तेज(जो)लेश्या । पद्मलेश्या। शुक्ललेश्या । एते षट् लेश्याः ॥

(१४) **द्विविधं शीलम्** । कतमाः । (मं) ? । सामायिकाधिकरणं । केवलज्ञानं चेति ॥

**इति अर्हत् प्रवचने चतुर्थोऽध्यायः समाप्त : ॥**

## [ पञ्चमोऽध्यायः ]

त्रिविधो योगः । चत्वारः कषायाः । त्रयो दोषाः । पञ्चाश्रवाः । त्रिविधः संवरः। द्विविधा निर्ज्जरा । पञ्च लब्धयः । चतुर्विधो बन्धः । पञ्च बन्धहेतवः । अष्टौ कर्म्माणि । द्विविधो मोक्षः । चत्वारो मोक्षहेतवः । त्रिविधो मोक्षमार्ग्गः। । पं[च] विधा निर्गन्थाः । त्रिविधा( :) सिद्धा( :) । दादश सिद्धस्यात्(नु)योगद्वाराणि । अष्टौ सिद्धगुणाः । द्विविधा( :) सिद्धाः। वैराग्यं च ॥

इति अर्हत्प्रवचने पञ्चमसूत्रम् ॥

(१) **त्रिविधो योगः** । कतमः ? मनोयोगः । वाग्योगः । काययोगश्चेति । इत्येष त्रिविधो योगः ॥

(२) **चत्वारः कषायाः** । कतमाः ? क्रोधकषायः । मानकषायः । मायाकषायः। लोभकषायश्चेति । एते चत्वारः कषायाः ॥

(३) **त्रयो दोषाः** । कतमाः ? । रागद्वेषमोहाश्चेति । एते त्रयो दोषा : ॥

(४) **पञ्चाश्रवाः** । कतमाः ? हिंसाश्रवः । अनृताश्रवः । स्तैन्याश्रवः । अब्रह्मचर्याश्रवः। परिग्रहाश्रवेत्येते पञ्चाश्रवाः ॥

(५) **त्रिविधः संवरः** । कतमः ? । कायसंवरः । वाक् संवरः । मनःसंवरश्चेति । एष त्रिविधः संवर : ॥

(६) **द्विविधा निर्ज्जरा** । कतमा ? । ज्ञाननिर्ज्जरा । तपोनिज्जराश्चे(चे)र ति ॥

(७) **पञ्च लब्धयः** । कतमाः ? । दानलब्धिः । लाभलब्धिः । भोगलब्धिः । उपभोगलब्धिः । वीर्यलब्धिः । एताः पञ्च लब्धयः ॥

(८) **चतुर्विधो बन्धः** । कतमः ? । प्रकृतिबन्धः । स्थितिबन्धः । अनुभागबन्धः। प्रदेशबन्धः । एष श्च(च)तुर्विधो बन्धः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(९) **पञ्चबन्धहेतवः** । कतमाः ? । मिथ्यादर्शनं । अविरतिः । प्रमादः । कषाय(:)। योगश्चेति पञ्च बन्धहेतवः ॥

(१०) **अष्टौ कर्म्माणि** । कतमानि ? । ज्ञानावरणीयं । दर्शनावरणीयं। वेदनीयं । मोहनीयं । आयु(:) । नाम । गोत्रं । अन्तरायश्चेति ॥ यस्योदयात् ज्ञेयं वस्तु न जानाति तत्-(द्) ज्ञानावरणीय(यं)नाम कर्म । जे(ये)न जीवा(:) पुण्यपापाश्रवबन्धनिर्जरामोक्षादिलक्षणान् सर्वभावं(वान्)न पश्यति(न्ति) तद्दर्शनावरणीयं नाम कर्म्म । यस्योदयातु(त्) स(शा)रीरं मानु(न)सं दुःखं उदीर्यते तत्(द्) वेदनीयं नाम कर्म्म । येन क्रोधलोभमानमायारतिऽरति-(रत्यरति)शोकभयजुगुप्सादीनि उदीर्यते(न्ते) तत्(द्) मोहनीयं नाम कर्म्म । येन नरकतिर्यग्मनुष्यामरेषु दीर्घं ह्रस्वं वा कालं तिष्ठति तदायुर्नाम कर्म्म । येनाङ्गप्रत्यङ्ग स(श)रीरं संस्थानं विरूपं स्वरूपं वा निवर्त्तयति तन्नाम कर्म्म । येन तिर्यग्मनुष्यामरेषु उच्चं नीचं वा स्थानं निवर्त्तयति तदाऽन्तरायं (तद् गोत्रं) नाम कर्म्म । येन दानलाभभोगोपभोगवीर्यानि(णि) नोत्पद्यन्ते तदन्तरायं नाम कर्म्म ॥ अत्र श्लोकाः –

यस्योदयेन जीवो जीवा विज्ञेय कर्म्म शुभाशुभम् । (?)
ज्ञानावरणमाख्यातं सर्व्वज्ञैस्तत्त्वदर्शिभिः ॥
यस्योदयात् सा(दयवशा)ज्जीवो भावाभावं न पश्यति ।
दर्शनावरणं प्राहुः सर्व्वज्ञा मुनिसत्तमाः ॥
सुखं वा यदि वा दुःखं वेदयन्ति हि येन ता(ते)
वेदनीयं तदित्याहुः सर्व्वज्ञास्तत्त्वदर्शिनः ॥
कषाया नोकषायाश्च मिथ्यादर्शनमेव च ।
मोहनीयं तदित्याहुः सर्व्व(ज्ञा)स्तत्त्वदर्शिनः ॥
जायते मृ(म्रि)यते चैव जीवा [य]स्योदयेन त्(तत्) ।
आयुष्यं नाम तत् कर्म्म प्राहुरेव मनीषिणः ॥
स्वरूपो[वा] विरूपो वा सुभगो दुर्भगोऽपि वा ।
कर्मणा जायते येन नामकर्मं(र्म) तदुच्यते ॥
जघन्यमथवा श्रेष्ठं येन गोत्रमवाप्यते ।
ऐश्वर्यं प्रेष्यभावश्च गोत्रकर्म्म तदुच्यते ॥
येन लाभो न[ल]भ्येत कर्मकर्मार्थसंचित : ॥(?)
न चोपभु(भुं)क्ते संप्राप्तः अन्तरायः स उच्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सु(शु)भानां कर्मणां हेतुः सु(शु)भ एव स्मृतो बुधैः ।
अशुभानां चाशुभः प्रोक्त(क्तो) जिनेन्द्रैस्तत्त्वदर्शिभिः ॥

(११) **द्विविधो मोक्षः** । कतमः? । देशमोक्षः। सर्व्वमोक्षश्चेति ।

देशमोक्षोनाम सासन(सास्वादन?) सम्यग्दृष्ट्यादिसयोगकेवलिपर्यन्तः ।सर्व्वमोक्षो नाम अजो(यो)गकेवली सिद्धश्चेति ॥

(१२) **चत्वारो मोक्षहेतवः** । कतमाः ? । सम्यग्दर्शनं । सम्यक्(ग्)ज्ञानं । सम्यक्चारित्रं । सम्यक् तपश्चेति ॥

(१३) **त्रिविधो मोक्षमार्ग्गः** । कतम : ? । सम्यग्दर्शनं । सम्यग्ज्ञानं । सम्यक् चारित्रमिति ॥

(१४) **पञ्चविधा निर्ग्रन्थाः** । कतमाः ? । पुलाकः । बकुस(श) : । कुसी(शी)लः। निर्ग्रन्थः । स्नातकश्चेति ॥ यः स्थित्यादिकरणकारणोद्युक्तः मार्ग्गप्रभावकः सप्रतिकारी प्रशस्तवचनःकुशलः सर्व्वज्ञप्रतिष्ठापनः पूजादीनां कर्त्ता कारयिता च स पुलाको नाम । यो मतिश्रुतप्रतिपादनमार्ग्गप्रभावना(नो)द्युक्तः अर्हन्सु(त् शु)द्धसील:(शील)कथाभिलो-(लों)क परिपाटी **प्रथमानुयोग** वाचकः यथाशक्ति तपस्त्यागकर्ता विनयशीलो अन्य(न्यं) समुपदिश्य प्रवर्तकः अर्हदाचार्यबहुश्रुत प्रवचनं(न) भक्ति स्तुतिवन्दनालोचनप्रतिक्रमण-कायोत्सर्ग्गाणां कारकः सुप्रसन्न(:) परिहारसंज(य)मधरः स एष बपु(कु)शो नाम । ईषत्पण्डितशीलः कुशीलः दयापरः परमकारुणिकः सर्व्वभूतमैत्रीपरायणः अत्यन्तसूक्ष्म सा(स) म्परायसंज(य)मधरः द्वादशाङ्ग चतुर्द्दशपूर्व्वपारगः घोरवीरतपश्च[र]णोद्युक्तः स एष कुशीलो नाम। बाह्याभ्यन्तर ग्रन्थार्थपरित्यागी । बाह्यपरिग्रहः क्षेत्रव(वा)स्तुहिरण्यधनधान्य-कुप्यपसु(शु)पाल्यपुत्रदाराभिः। अभ्यन्तरप(रि)ग्रहः क्रोधमानमायालोभमात्सर्यक्रीड(डा)-रतिशोकभयजुगुप्साहास्यप्रमत्तयोगप्रत्याख्यानर्हिसानृतस्तेयमैथुनपरिग्रहादिग्रन्थपरित्याग-शीलः । चतुर्ज्ञानसम्पन्नो लब्धिप्राप्तः शुक्लध्यानपरः निर्ममो निरहङ्कारः उत्तमसंज(य)मधरः विशुद्धलेश्यः स एष निर्गन्थो नाम । परमेश्वरः सर्व्वज्ञो लोकालोकविचारकः चतुस्त्रिंशदतिशयलब्धिप्राप्तः अष्टमहाप्रातिहार्यसमन्वितः स एष स्नातको नाम । एते पञ्चविधा निर्ग्रन्थाः ॥

(१५) **त्रिविधाः सिद्धाः** । कतमाः ? । क्षेत्रसिद्धाः । कालसिद्धाः । भावसिद्धाश्चेति । तत्र ये पञ्चदशकर्म्मभूमिषु जाता ऊर्ध्वाधस्तिर्यग्लोकेषु सिध्यन्ति ते क्षेत्रसिद्धाः । ये उत्सर्पिण्यो(ण्यां?) जाताः तीर्थेषु एकसमयसिद्धा द्विसमयसिद्धा(:)तृ(त्रि)चतुरसंख्येय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समयसिद्धाः ते कालसिद्धा नाम । ये अष्टविधकर्म्मविनिर्मुक्त( : ) सिद्धि प्राप्ताः ते भावसिद्धा नाम । एते त्रिविधा( : ) सिद्धाः ॥

(१६) **द्वादश सिद्धस्यानुयोगद्वाराणि** । कतमानि ? । कालो(लः) । गतिः । लिङ्गः(ङ्गम्)तीर्थ(म्) । चारित्रः(त्रं) । प्रत्येकबुद्धः । बोधितबुद्धः । ज्ञानावगाहनं (ज्ञानम् । अवगाहना ।) अनांतरं (अन्तरं) । संख्याअल्पबहुत्वतश्चेति(त्वं चेति) । एतानि द्वादश सिद्धस्यानुयोगद्वाराणि॥

(१७) **अष्टौ सिद्धगुणाः** । कतमाः ? । अनन्तदर्शनं । अनन्तज्ञानं । अनन्तवीर्यं । अनन्तसुखं । सूक्ष्मत्वं । अनन्तावगाहः । अग(गु)रुलहु(घु)त्वं । अव्याबाधश्चेति । एते अष्टगुणाः ॥

(१८) द्विविधा( : )सिद्धाः । कतमाः ? । मोहान्तराय [ज्ञान] दर्शनावरणीयक्षयात् कैवल्यप्राप्तिसिद्धाः । आयुर्नामगोत्रवेदनीयक्षयात् स्नातकसिद्धाश्चेति ॥ तत्र मोहो नाम द्विविधः । चारित्रमाह(हो)दर्शनमोहश्चेति । चारित्रमोहक्षयात्(द्) वीतरागो भवति । दर्शन-मोहक्षयात् सम्यग्दृष्टिर्भवति । अन्तरायक्षयात्(द्)दिव्यानि दानलाभभोगोपभोगवीर्याण्यु-त्पद्यन्ते । ज्ञानावरणीयक्षयात् सर्व्वज्ञो भवति । दर्शनावरणीयक्षयात् सर्व्वदर्शी भवति । आयुष्यकर्म्मक्षयात्(द्) जन्ममरणव्याधिविनिर्मुक्तो भवति । नामकर्म्मक्षयात्(द्) औदारिकवैक्रियाहारकतैजसकार्मणशरीरं(र)तत्त्वविनिर्मुक्तो भवति । आकास(श)-वदमूर्तश्चक्षुरग्राही ज्योजावध(?) रूपो भवति । गोत्रकर्मक्षयात् सदेवासुरमनुष्य-लोकस्योत्तमस्थानं प्राप्नोति । वेदनीयकर्मक्षयात् सुखदुःखाभ्यां विनिर्मुक्तो भवति । केवलमव्याबाधं सम्प्राप्तो भवति । लोकाग्रे प्रतिष्ठितो अदेही शाश्वतो वक्तो( मुक्तो) अमरो अजरो निरंजनो भवति । एते षट् (? द्वि)विधाः सिद्धा भवन्ति ॥

**इत्यर्हत्प्रवचने पञ्चमोऽध्याय समाप्तः ॥**

मङ्गलं महाश्रीः ॥ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## कलिकालसर्वज्ञ श्री हेमचन्द्राचार्य नवम जन्मशताब्दी स्मृति शिक्षण–संस्कार निधिनां प्रकाशनो

| | | |
|---|---|---|
| त्रिषष्टिशलाकापुरुषचरितमहाकाव्य–ग्रन्थ १ (पुनर्मुद्रण) | संपा. मुनि चरणविजयजी | १९८७ |
| ,, ग्रन्थ २ | संपा. मुनि पुण्यविजयजी | |
| Studies in Des'ya Prakrit | H. C. Bhayani | 1988 |
| हेमसमीक्षा (पुनर्मुद्रण) | मधुसूदन मोदी | १९८९ |
| हेम स्वाध्यायपोथी (डायरी) | सं. मुनि शीलचन्द्रविजय | १९८९ |
| हेमचन्द्राचार्यकृत अपभ्रंश व्याकरण (सिद्धहेमगत) (द्वितीय संस्करण) | संपा. हरिवल्लभ भायाणी | १९९३ |
| विजयपालकृत द्रौपदीस्वयंवर (पुनर्मुद्रण) | आद्य संपा. जिनविजयजी मुनि संपा. शान्तिप्रसाद पंड्या | १९९३ |
| कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य स्मरणिका | | १९९३ |
| अनुसंधान–१ (अनियतकालिक) | | १९९३ |
| ,, २-३-४ | | १९९४ |
| अपभ्रंश व्याकरण (हिन्दी अनुवाद) | प्रा. बिन्दु भट्ट | १९९४ |
| आवश्यक–चूर्णि | संपा. मुनि पुण्यविजयजी सहायक रूपेन्द्रकुमार पगारिया | मुद्रणाधीन |
| प्रवंधचतुष्टय | संपा. रमणीक शाह | १९९४ |

## नेमिनंदन ग्रंथमाळानां हमणांनां प्रकाशन

| | | |
|---|---|---|
| अलंकारनेमि | मुनि शीलचन्द्रविजय | १९८९ |
| हेमचन्द्राचार्यकृत महादेवबत्रीशी–स्तोत्र | संपा. मुनि शीलचन्द्रविजय | १९८९ |
| श्रीजीवसमास-प्रकरण टीकाकार मलधारी हेमचन्द्रसूरे | संपा. मुनि शीलचन्द्रविजय | १९९४ |
| ,, (गुजराती अनुवाद) | चं. ना. शिनोरवाला | १९९४ |

प्राप्तिस्थान : सरस्वती पुस्तक भंडार, हाथीखाना, रतनपोल, अहमदाबाद–३८०००१

Jain Education International For Private & Personal Use Only www.jainelibrary.org